त्याज्यं न धैर्यं विधुरेऽपि काले धैर्यात्कदाचिद्गतिमाप्नुयात्सः ॥ राम प्राह लक्ष्मणः । उत्साहो बलवानार्य ? शोकं विसृज्याश्रु धृतिं भजस्व सोत्साहता चास्तु विमार्गणेऽस्याः । उत्साहवन्तो हि नरा न लोके सीदन्ति कर्मस्वतिदुष्करेषु । अथान्यदा सीतायाः स्वयंवर तिथौ तस्या पावनम् चरितं पठनीयं श्रवणीयञ्च । [illegible] कवाटिकां नीतायास्तस्या रावणेन सह सतीनां मानदर्पनः संवादः स्मरणीयः । वा. रा.—सुन्दरकाण्डे—सीतां परिवृतां दीनां निरानन्दां तपस्विनीम् । साकारैर्मधुरैर्वाक्यैर्न्यदर्शयत रावणः ॥ मां दृष्ट्वा नागनासोरु गूहमानास्तनोदरम् । अदर्शनमिवात्मानं भयान्नेतुं त्वमिच्छसि ॥ कामये त्वां विशालाक्षि बहुमन्यस्व मां प्रिये । सर्वाङ्गगुणसम्पन्ने सर्वलोकमनोहरे ॥ भव मैथिलि भार्या मे मोहमेनं विसर्जय ॥ बह्वीनामुत्तमस्त्रीणां ममाग्रमहिषी भव ॥ तस्य तद्वचनं श्रुत्वा सीता रौद्रस्य रक्षसः । आर्ता दीनस्वरा दीनं प्रत्युवाच ततः शनैः ॥ दुःखार्ता रुदती सीता वेपमाना तपस्विनी । चिन्तयन्ती वरारोहा पतिमेव पतिव्रता । तृणमन्तरतः कृत्वा प्रत्युवाच शुचिस्मिता । निवर्तय मनो मत्तः स्वजने क्रियतां मनः । न मां प्रार्थयितुं युक्तस्त्वं सिद्धिमिव पापकृत् । अकार्यं न मया कार्यमेकपत्न्या विगर्हितम् । कुलं संप्राप्तया पुण्यं कुले महति जातया ॥ एवमुक्त्वा तु वैदेही रावणं तं यशस्विनी । रावणं पृष्ठतः कृत्वा भूयो वचनमब्रवीत् ॥ नाहमौपयिकी भार्या परभार्या सती तव । साधु धर्ममवेक्षस्व साधु साधुव्रतं चर । यथा तव तथान्येषां रक्ष्या दारा निशाचर । आत्मानमुपमां कृत्वा स्वेषु दारेषु रम्यताम् ॥ अतुष्टं स्वेषु दारेषु चपलं चपलेन्द्रियम् । नयन्ति निकृतिप्रज्ञं परदाराः पराभवम् । शक्या लोभयितुं नाहमैश्वर्येण धनेन वा । अनन्या राघवेणाहं भास्करेण यथा प्रभा ॥ साधु रावण रामेण मां समानय दुःखिताम् । वने वासितया सार्धं करेण्वेव गजाधिपम् ॥ सीतायाः वचनं श्रुत्वा परुषं राक्षसेश्वरः । प्रत्युवाच ततः सीतां विप्रियं प्रियदर्शनाम् ॥ संनियच्छति मे क्रोधं त्वयि कामः समुत्थितः । द्रवतो मार्गमासाद्य हयानिव सुसारथिः ॥ वामः कामो मनुष्याणां यस्मिन् किल निबध्यते । जने तस्मिंस्त्वनुक्रोशः स्नेहश्च किल जायते ॥ एतस्मात्कारणान्नत्वां घातयामि वरानने । वधार्हामवमानार्हां मिथ्या प्रव्रजने रताम् ॥ एवमुक्त्वा तु वैदेहीं रावणो राक्षसाधिपः । क्रोधसंरम्भसंयुक्तः सीतामुत्तरमब्रवीत् ॥ द्वौ मासौ रक्षितव्यौ मे योऽवधिस्ते मया कृतः । ततः शयनमारोह मम त्वं वरवर्णिनि ॥ द्वाभ्यामूर्ध्वं तु मासाभ्यां भर्तारं मामनिच्छतीम् । मम त्वां प्रातराशार्थं सूदाश्छेत्स्यन्ति खण्डशः ॥ तां भर्त्स्यमानां संप्रेक्ष्य राक्षसेन्द्रेण जानकीम् । देवगन्धर्वकन्यास्ता विषेदुर्विकृतेक्षणाः । ओष्ठप्रकारैरपरा नेत्रैर्वक्त्रैस्तथाऽपराः । सीतामाश्वासयामासुस्तर्जितान्तेन रक्षसा ॥ ताभिराश्वासिता सीता रावणं राक्षसाधिपम् । उवाचात्महितं वाक्यं वृत्तशौण्डीर्यगर्वितम् । तस्य धर्मात्मनः पत्नीं स्नुषां दशरथस्य च । कथं व्याहरतो मां ते न जिह्वा पाप शीर्यति ॥ असन्देशात्तु रामस्य तपसश्चानुपालनात् । न त्वां कुर्मि दशग्रीव भस्म भस्मार्ह तेजसा ॥ नूनं न ते [illegible] काश्चदस्मिन्निवसति संस्थितः । निवारयति यो न त्वां कर्मणोऽस्माद्विगर्हितात् ॥ राजसाऽधम रामस्य भार्याममिततेजसः । उक्तवानसि यत्पापं क्वगतस्तस्य मोक्ष्यसे ॥ ततः सीतां समस्तास्ता राक्षस्यो विकृताननाः । परुषं परुषानर्हामूचुस्तद्वाक्यमप्रियम् ॥ राक्षसीनां वचः श्रुत्वा सीता पद्मनिभेक्षणा । [illegible] न मानुषी राक्षसस्यभार्या भवितुमर्हति । कामं खादत मां सर्वा न करिष्यामि वो वचः ॥ दीनो वा राज्यहीनो वा यो मे भर्ता स मे गुरुः । तं नित्यमनुरक्ताऽस्मि यथा सूर्यं सुवर्चला ॥ यथा शची महाभागा शक्रं समुपतिष्ठति । अरुन्धती वसिष्ठं च रोहिणी शशिनं यथा । लोपामुद्रा यथाऽगस्त्यं सुकन्या च्यवनं यथा । सावित्री सत्यवन्तं च कपिलं श्रीमती यथा । सौदासं मदयन्तीव भैमी पतिं [illegible] । नैषधं दमयन्तीव भैमी पति[illegible] तथाऽहमिक्ष्वाकुवरं रामं पतिमनुव्रता ॥ [illegible]

CC-0 In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation, Delhi and eGangotri.Funding by MoE-IKS

...ते—यद्धि किञ्चित् संधार्य पुरुषस्तप्यते तपः । सर्वमेतदवाप्नोति विद्यया चेति नः श्रुतम् ॥ दुरन्वयं दुष्प्रधर्षं दुरापं दुरतिक्रमम् । सर्वं वै तपसाऽभ्येति तपोहि बलवत्तरम् । प्रजापतिरिदं सर्वं तपसैवासृजत्प्रभुः । तथैव वेदानृषयस्तपसा प्रतिपेदिरे ॥ इमानीष्टविभागानि फलानि तपसः सदा ॥ तपसा शक्यते प्राप्तुं दैवत्वमपि निश्चयात् ।

श्रीशुभसंवत् २०२७ शकः १८९२ मार्गशीर्षशुक्लपक्षः (नवम्बर ता० २९,३० दिसम्बर ता० १···१२ सन् १९७०) याम्यायनं, याम्यगोलः, हेमन्तर्तुः ।

ति.	वा.	घ. प.	समय	घं. मि.	न.	घ. प.	समय	घं. मि.	यो	घ. प	समय	घं. मि.	क.	घ. प.	घं. मि.	क.	घ. प.	घं. मि.	योगः	अं.	का.	वं.	फ.	रा.	चन्द्रराशिसंचारः रा.	घ. प.	घं. मि.	सूर्योदय	सूर्यास्त	र. क्रा. द.	चन्द्रास्त घं. मि.
१	सू.	४९ ३२	रा.	२ ३१	अनु.	९ ४१	दि.	१० ३५	सु.	२६ २४	दि.	१७ १६	कि.	२० २	१४ ४[illegible]	व.	६१ ३२	२ ३१	मृत्यु	२९	२९	१३	१६	८				६ ४३	५ १७	२१ २२	०
२	च.	४७ २०	रा.	१ ३९	ज्ये.	९ ४८	दि.	१० ३८	धृ.	२२ २	दि.	१५ ३२	बा.	१८ २६	१४ [illegible]	कौ.	४७ २०	१ ३९	पद्म	३०	३०	१४	१७	९	ध.	९ ४८	१० ३८	६ ४३	५ १७	२१ ३३	१८ २१
३	मं.	४४ ६	रा.	० २२	मू.	८ ४७	दि.	१० १४	शू.	१६ ४७	दि.	१३ २६	तै.	१५ ४३	१३ [illegible]	ग.	४४ ६	० २२	छत्र	१	१	१५	१८	१०				६ ४३	५ १७	२१ ४२	१९ २४
४	बु.	३९ ५८	रा.	२२ ४३	पू.	६ ४९	दि.	९ २७	गं.	१० २१	दि.	१० ५२	व.	१२ २	११ ३[illegible]	वि.	३९ ५८	२२ ४३	श्रीवत्स	२	२	१६	१९	११	म.	२१ ७	१५ १०	६ ४४	५ १६	२१ ५२	२० ३०
५	गु.	३५ ६	रा.	२० ४६	उ.	४ १	प्रा.	८ २०	वृ.	[illegible]	दि.	[illegible]	व.	७ ३२	९ [illegible]	बा.	३५ ६	२० ४६	ध्वांक्ष	३	३	१७	२०	१२				६ ४४	५ १६	२२ १	२१ ३६
६	शु.	२९ ४०	प्रा.	१८ ३६	श्र.	[illegible]	प्रा.	[illegible]	व्या.	४८ ५३	रा.	२ १७	कौ.	२ २३	७ ४[illegible]	[illegible]	[illegible]	[illegible]	धूम्र	४	४	१८	२१	१३	कुं.	२८ ३९	१८ १२	६ ४४	५ १६	२२ ९	२२ ४०
७	श.	२३ ५०	दि.	१६ १६	ध.	५२ ३५	रा.	३ ४७	ह.	४१ ३	रा.	२३ १०	व.	२३ ५०	१६ [illegible]	[illegible]	५० ५३	३ ६	आनन्द	५	५	१९	२२	१४				६ ४५	५ १५	२२ १७	२३ ४३
८	सू.	१७ ५७	दि.	१३ ५६	पू.	४८ २३	रा.	२ ६	व.	३३ ५	दि.	१९ ५९	व.	१७ ५७	१३ [illegible]	[illegible]	५५ ०	० ४५	चर	६	६	२०	२३	१५	मी.	३४ २७	२० ३१	६ ४५	५ १५	२२ २५	० ४०
९	च.	१२ ३	दि.	११ ३४	उ.	४४ २१	रा.	० २९	सि.	२५ १२	दि.	१६ ५०	कौ.	१२ ३	११ [illegible]	[illegible]	३९ १५	२२ २७	गद	७	७	२१	२४	१६				६ ४५	५ १५	२२ ३२	१ ४४
१०	मं.	६ २७	दि.	९ २०	रे.	४० ४१	रा.	२३ २	व्य.	१७ ३१	दि.	१३ ४६	ग.	६ २७	९ [illegible]	[illegible]	३३ ५३	२० १९	शुभ	८	८	२२	२५	१७	मे.	४० ४१	२४ २	६ ४५	५ १५	२२ ३९	२ ४७
११	बु.	[illegible]	प्रा.	[illegible]	अ.	३७ ३४	रा.	२१ ४७	व.	१० ४०	दि.	११ २	वि.	१ १९	७ [illegible]	[illegible]	[illegible]	[illegible]	मृत्यु	९	९	२३	२६	१८				६ ४६	५ १४	२२ ४५	३ ५०
१३	गु.	५३ ११	रा.	४ २	भ.	३५ १२	रा.	२० ५१	प.	[illegible]	रा.	[illegible]	कौ.	२५ ०	१६ [illegible]	[illegible]	४३ ११	४ २	पद्म	१०	१०	२४	२७	१९	वृ.	४९ ५०	२ ४२	६ ४६	५ १४	२२ ५१	४ ५५
१४	शु.	५० २५	रा.	३ ५६	कृ.	३३ ४६	रा.	२० १७	सि.	५२ ५३	रा.	३ ५५	ग.	२१ ४८	१५ [illegible]	[illegible]	५० २५	३ ५६	छत्र	११	११	२५	२८	२०				६ ४५	५ १४	२२ ५७	९ ५९
१५	श.	४८ २१	रा.	२ १९	रो.	३२ २६	रा.	२० ९	सा.	४८ ३४	रा.	२ १२	वि.	१९ ३८	१४ [illegible]	[illegible]	४८ ५१	२ १९	श्रीवत्स	१२	१२	२६	२९	२१				६ ४६	५ १४	२३ २	× ×

इष्टिः । स्त्रोपवासः(पीडिया इति लोके प्रसिद्धम्)। मैत्रे पुंसवनसीमन्तोन्नयनप्रसूतिकास्नानक्वाथपथ्यौषधसेवनशिशोस्ताम्बूलभक्षणनौकाघट्टनकणमर्दनलतावृक्षादिरोपण मु. । मैत्रे यायि*
चन्द्रदर्शनम् मु० ३० फलं समम् । ज्येष्ठायामृतुमतीस्नानभूम्युपवेशनशिशोस्ताम्बूलभक्षणनृत्यारम्भधान्यच्छेदनकणमर्दनगोक्रयविक्रयादि मु. ।
सव्वाल १० । मूले पुंसवनसीमन्तोन्नयनादि मु. । रात्रिशेषे पूर्वायां स्थायीजयद मु. । *यात्रा मु. । अनु. ४ च रविः ४२।२० मु. २ च. बुध २४।५ ।
भ. १२।२ (दि. ११।३२) उ. ३९।५८ (रा. २२।४३) या. । वैनायकी ४ । रात्रिशेषे नववस्त्रधारणलतावृक्षादिरोपण मु. । ज्येष्ठायामर्कः ५८।४७ । मू. ३ च. बुधः ९।३६ ।
नागपञ्चमी ५ । श्री रामविवाहदिनम् । बलदेव जयन्ती (इयमेव हलधर जयन्ती) । पञ्चम्यां पुंसवनसीमन्तोन्नयनप्रसूतिकास्नानजातकर्मनामकरणान्नप्राशननववस्त्रभूषाधारणा
पञ्चकारम्भः २८।३९ (सा. १८।१२) । अद्यसप्तम्यां विविध शुभकर्मादिकृते समयोऽन्वेष्यः । स्वातीभे शुक्रः २१।२० ।
भ. २३।५० (दि. १६।१६) उ. ५०।५३ (रा. ३।६) या. । विष्टेः पूर्वमासवारिष्टनिर्माणपश्चिमदिग्गमनादि मु. । मू. ४ च. बुधः १९।२६ ।
पूर्वायां विक्रयः शुभः । रात्रिशेषे उत्तरायां यायिजयप्रदयोगश्च । अनु. भे. २च. रविः १५।०। †नौकाघट्टनधान्यच्छेदनविपणिव्यापारादिविविध मु. । चि. ४ च. कुजः १६।०।
अद्य दशम्यां व्यतिपातात्पूर्वं जातकर्मनामकरणान्नप्राशनभूम्युपवेशनखट्वारोहणकर्णवेधशिशोस्ताम्बूलभक्षणलतावृक्षादिरोपण मु. ।
भ. ३३।५३ (रा. २० १९) उ. । मोक्षदा ११ एकादशी व्रतं स्मार्त्तानाम् । पञ्चकनिवृत्तिः ४०।४१ (रा. २३।२) । विष्टेः पूर्वं व्यतिपातात्परं पुंसवनसीमन्तोन्नयनप्रसूतिकास्नान§
भ. १।१९ (प्रा. ७।१७) या. मोक्षदा ११ एकादशीव्रतं वैष्णवानाम् । अद्य तिथिक्षयदोषसत्त्वेऽपि वश्यके अश्विन्यां सामान्यशुभकर्मणां मुहूर्तोऽन्वेष्यः । ७ ज्ये. ३ च. रविः ३३।४ ।§
प्रदोषः । भरण्यां नवशय्यासनादिभोगश्शुभः । वह्निभे इष्टिकादाहः शुभः । §सुभगेतरनववस्त्रादि धारण मु. । स्वात्यां कुजः ३५।५७ । अनुराधा भे गुरुः १८।७ ।
भ. ५०।२५ (रा. ३।५६) उ. । अद्य रिक्ताविष्टिदोषाच्छुभकर्ममुहूर्त्ताभावः । §पूर्वाषाढाभेबुधः २३।५ । स्वा. २ च. शुक्रः ३१।४० ।
भ. १९।३८(दि. १४।३७)यां. । व्रतस्नानदानादौपूर्णिमा १५ पुण्यतमा । विष्टेःपरं सामान्यशुभकर्मणां मुहूर्त्तोऽन्वेष्यः । ज्ये. ४ च. रविः ४६।५६ । भ. १ च. वक्री शनिः ५०।३५ ।

विवाह मुहूर्त्ताः

ति. १ रवौ–मैत्रे शनिवेधाल्लग्नाभावः ।
ति. २ चन्द्रे–मूले ॥ऽ॥॥॥ रे. ९ ल. गो. वा ६ न. दा. ।
ति. ३ भौमे–मूले दिवालग्नं चिन्त्यम् ।
ति. ४ बुधे–उ.षा. भे ॥॥ऽ।ऽ॥ रे. ८ विष्टेः परं ल. चि. ।
ति. ५ गुरौ–उ. षा. भे स्वल्पकालः ।
ति. ९ चन्द्रे–उ. भा. भे व्यतिपातात्पूर्वं दिवा लग्नं चिन्त्यम् ।
ति. १० भौमे–रेवती भे ॥॥ऽ॥॥ रे. ९ ल. गोधूलिः ।
ति. १४ शुक्रे–रोहिणीभे ॥॥ऽ॥ऽ रे. ८ विष्टेः पूर्वं लग्नं चिन्त्यम् ।
ति. १५ शनौ–रोहिण्यां मृगे च ॥॥ऽऽ॥॥ रे. ८ विष्टेः परं लग्नं चिन्त्यम् ।

दैनिक लग्नसारिणी

	मे. प्र.	वृ. प्र.	मि. प्र.	क. प्र.	सिं. प्र.	क. प्र.	तु. प्र.	वृ. प्र.	ध. प्र.	म. प्र.	कु. प्र.	मी. प्र.
[illegible]	१६ ५६	१६ ३४	१८ ३०	२० ४३	२३ १	१ १५	३ २८	५ ४६	८ १	१० ७	११ ५३	१३ २[illegible]
[illegible]	१६ ५२	१६ ३०	१८ २६	२० ३९	२२ ५७	१ ११	३ २४	५ ४०	७ ५७	१० ३	११ ४९	१३ [illegible]
[illegible]	१६ ४८	१६ २६	१८ २२	२० ३५	२२ ५३	१ ७	३ २०	५ ३६	७ ५३	९ ५९	११ ४५	१३ [illegible]
[illegible]	१६ ४३	१६ २२	१८ १७	२० ३०	२२ ४८	१ ३	३ १५	५ ३१	७ ४८	९ ५४	११ ४०	१३ [illegible]
[illegible]	१६ ३९	१६ १७	१८ १३	२० २६	२२ ४४	० ५८	३ ११	५ २७	७ ४४	९ ५०	११ ३६	१३ [illegible]
[illegible]	१६ ३५	१६ १३	१८ ९	२० २२	२२ ४०	० ५४	३ ७	५ २३	७ ४०	९ ४६	११ ३२	१३ [illegible]
[illegible]	१६ ३०	१६ ८	१८ ४	२० १७	२२ ३५	० ४९	३ २	५ १८	७ ३५	९ ४१	११ २७	१२ [illegible]
[illegible]	१६ २६	१६ ४	१८ ०	२० १३	२२ ३१	० ४५	२ ५८	५ १४	७ ३१	९ ३७	११ २३	१२ [illegible]
[illegible]	१६ २२	१६ ०	१७ ५६	२० ९	२२ २७	० ४१	२ ५४	५ १०	७ २७	९ ३३	११ १९	१२ [illegible]
[illegible]	१६ १८	१५ ५६	१७ ५२	२० ५	२२ २३	० ३७	२ ५०	५ ६	७ २३	९ २९	११ १५	१२ [illegible]
[illegible]	१६ १३	१५ ५१	१७ ४७	२० ०	२२ १८	० ३२	२ ४५	५ १	७ १८	९ २४	११ १०	१२ [illegible]
[illegible]	१६ ९	१५ ४७	१७ ४३	१९ ५६	२२ १४	० २८	२ ४१	४ ५७	७ १४	९ २०	११ ६	१२ [illegible]
[illegible]	१६ ५	१५ ४३	१७ ३९	१९ ५२	२२ १०	० २४	२ ३७	४ ५३	७ १०	९ १६	११ २	१२ [illegible]
[illegible]	१६ १	१५ ३९	१७ ३५	१९ ४८	२२ ६	० २०	२ ३३	४ ४९	७ ६	९ १२	१० ५८	१२ [illegible]

ति. २-चन्द्रे–बुधचन्द्रयुतिः र. प. १३।१४ चन्द्राद्दक्षिण ।
ति. १३ गुरौ–शनिचन्द्रयुतिः रे. व. १५।१६ शनिर्दक्षिणे ।

मिश्रमानकालिका दैनिक स्पष्टग्रहास्तत्र दिनद्वयग्रहान्तरं गतिः

र.मा.	स्प. सू.	स्प. च.	स्प. मं.	स्प. बु.	स्प. बृ.	स्प. शु.	स्प. श.	स्प. रा.	स्प. के.
[illegible]	७ १३ २२ ३५	७ २४ २४ ४८	६ १ ७ ५५	८ ३ ४६ ३१	७ १ २७ ३४	६ ४ १३ ३९	० १७ ३१ ३३	१० ८ १ १०	४ ८ १ १०
[illegible]	७ १४ २३ ३७	८ ७ ५२ ३	६ १ ४५ २६	८ ५ ० २९	७ १ ४० ४७	६ ४ ४३ १३	० १७ २७ १०	१० ७ ५७ ५९	४ ७ ५७ ५९
[illegible]	७ १५ २४ ४०	८ २१ ३३ ५४	६ २ २२ ५८	८ ६ ११ ४०	७ १ ५३ ५८	६ ५ १३ ४३	० १७ २२ ५०	१० ७ ५४ ४९	४ ७ ५४ ४९
[illegible]	७ १६ २५ ४५	९ ५ २८ ४८	६ ३ ० २८	८ ७ १९ ५१	७ २ ७ ९	६ ५ ४५ ५६	० १७ १८ ३५	१० ७ ५१ ३८	४ ७ ५१ ३८
[illegible]	७ १७ २६ ५०	९ १९ ३४ ३१	६ ३ ३७ ५८	८ ८ २४ ५१	७ २ २० १९	६ ६ १९ ४४	० १७ १४ २४	१० ७ ४८ २७	४ ७ ४८ २७
[illegible]	७ १८ २७ ५७	१० ३ ४८ १९	६ ४ १५ २८	८ ९ २६ २७	७ २ ३३ २६	६ ६ ५४ २३	० १७ १० १८	१० ७ ४५ १६	४ ७ ४५ १६
[illegible]	७ १९ २९ ५	१० १८ ७ ०	६ ४ ५२ ५८	८ १० २४ २५	७ २ ४६ ३३	६ ७ ३१ १५	० १७ [illegible] १७	१० ७ ४२ ६	४ ७ ४२ ६
[illegible]	७ २० ३० १४	११ २ २६ ५६	६ ५ ३० २७	८ ११ १८ २९	७ २ ५९ ३९	६ ८ ८ ५२	० १७ २ २०	१० ७ ३८ ५५	४ ७ ३८ ५५
[illegible]	७ २१ ३१ २५	११ १६ ४४ ९	६ ६ ७ ५६	८ १२ ८ २४	७ ३ १२ ४३	६ ८ ४७ ४८	० १६ ५८ २८	१० ७ ३५ ४४	४ ७ ३५ ४४
[illegible]	७ २२ ३२ ३६	० ० ५५ १२	६ ६ ४५ २५	८ १२ ५३ ५१	७ ३ २५ ४६	६ ९ २६ ४१	० १६ ५४ ४०	१० ७ ३२ ३३	४ ७ ३२ ३३
[illegible]	७ २३ ३३ ४८	० १४ ५७ ३	६ ७ २२ ५३	८ १३ ३४ ३७	७ ३ ३८ ४७	६ १० ९ १२	० १६ ५० ५७	१० ७ २९ २३	४ ७ २९ २३
[illegible]	७ २४ ३५ १	० २८ ४७ १०	६ ८ ० २२	८ १४ १० २६	७ ३ ५१ ४५	६ १० ५२ ०	० १६ ४७ १८	१० ७ २६ १२	४ ७ २६ १२
[illegible]	७ २५ ३६ १६	१ १२ २३ ३४	६ ८ ३७ ५०	८ १४ ४१ ०	७ ४ ४ ४२	६ ११ ३५ २७	० १६ ४३ ४७	१० ७ २३ १	४ ७ २३ १
[illegible]	७ २६ ३७ ३१	१ २५ ४४ ५८	६ ९ १५ १९	८ १५ ६ ६	७ ४ १७ ३७	६ १२ २० ३	० १६ ४० २०	१० ७ १९ ५०	४ ७ १९ ५०

ति. ४ बुधे



ति. ११ बुधे



पु.पु.रा.※ दीप्ता [illegible] प्रदीपिता । रावण नापतिष्ठेय किं [illegible] वशिवरम् ॥ हनुमानपिविक्रान्तः सर्वं पृच्छन तत्त्वतः । संश्रवे मधुरं वाक्यं वैदेह्या व्याजहार ह ॥ वानरोऽहं महाभागे दूतो रामस्य धीमतः । रामनामाङ्कितं चेदं पश्य देव्यङ्गुलीयकम् ॥ गृहीत्वा प्रेक्षमाणा सा भर्तुः करविभूषितम् ॥ भर्तारमिव संप्राप्तं जानकी मुदिताऽभवत् ॥ उवाच च । कल्याणीबत गाथेयं लौकिकी प्रतिभाति माम् ॥ एति जीवन्तमानन्दो नरं वर्षशतादपि ॥ तथा हि—रावणं समरे हत्वा रामः सीतामवाप ह । रामाय रामभद्राय रामचन्द्राय वेधसे । रघुनाथाय नाथाय सीतायाः पतये नमः ॥ पुत्रकामनया जाम्बवत्या प्रार्थितः श्रीकृष्णः तपस्तप्त्वा शूर शाम्बं जनयामास । महाभारते अनुशासनपर्वणि १४ अ.—वासुदेव उवाच—शम्बरे निहते पूर्वं रौक्मिणेयेन धीमता । अतीते द्वादशे वर्षे जाम्बवत्यब्रवीद्धि माम् ॥ शूरं बलवता श्रेष्ठ कान्तरूपमकल्मषम् । आत्मतुल्यं मम सुतं प्रयच्छाऽच्युत मा चिरम् ॥ त्वया द्वादशवर्षाणि व्रतीभूतेन शुद्धयता । आराध्य पशुभर्तारं रुक्मिण्या जनिताः सुताः ॥ यथा ते जनिताः पुत्रा रुक्मिण्यां चारुविक्रमाः । तथा ममापि तनयं प्रयच्छ मधुसूदन ॥ ततोऽहं तप आस्थाय तोषयामास शंकरम् । दत्तो भगवता पुत्रः शाम्बो नाम ममानघ इत्यादि द्रष्टव्यम् । सत्पुत्रप्राप्त्यर्थं स्त्रीभिः पुंसवनव्रतमाचरणीयम् ॥ श्रीमद्भागवते ६ स्क. १९ अ.—श्रीशुकउवाच–शुक्ले मार्गशिरे पक्षे योषिद्भर्तुरनुज्ञया । आरभेत व्रतमिदं सार्वकामिकमादितः ॥ निशम्य मरुतां जन्म ब्राह्मणाननुमन्त्र्य च । स्नात्वा शुक्लदती शुक्ले वसीतालंकृताम्बरे ॥ पूजयेत् प्रातराशात्प्राग्भगवन्तं श्रिया सह । अलं ते निरपेक्षाय पूर्णकाम नमोऽस्तु ते ॥ महाविभूतिपतये नमः सकलसिद्धये । यथा त्वं कृपया भूत्या तेजसा महिमौजसा ॥ जुष्ट ईश गुणैः सर्वैस्ततोऽसि भगवान्प्रभुः । विष्णुपत्नि महामाये महापुरुषलक्षणे । प्रीयेथा मे महाभागे लोकमातर्नमोऽस्तु ते ॥ ॐनमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सह महाविभूतिभिर्बलिमुपहराणीति ॥ अनेन मन्त्रेणाहरहर्विष्णोरावाहनार्घ्यपाद्योपस्पर्शनस्नानवासोपवीतविभूषणगन्धपुष्पधूपदीपोपहाराद्युपचारांश्च समाहित उपाहरेत् ॥ हविश्शेषं तु जुहुयादनले द्वादशाहुतीः ॥ ॐनमो भगवते महापुरुषाय महाविभूतिपतये स्वाहेति । श्रियं विष्णुं च वरदावाशिषां प्रभवावुभौ । भक्त्या संपूजयेन्नित्यं यदीच्छेत्सर्वसंपदः ॥ प्रणमेद्दण्डवद्भूमौ भक्तिप्रह्वेण चेतसा । दशवारं जपेन्मन्त्रं ततः स्तोत्रमुदीरयेत् ॥ युवां तु विश्वस्य विभू जगतः कारणं परम् । इयं हि प्रकृतिः सूक्ष्मा मायाशक्तिर्दुरत्यया । तस्या अधीश्वरः साक्षात् त्वमेव पुरुषः परः ॥ त्वं सर्वयज्ञ इज्येयं क्रियेयं फलभुग्भवान् । गुणव्यक्तिरियं देवी व्यञ्जको गुणभुग्भवान् ॥ त्वं हि सर्वशरीरात्मा श्रीः शरीरेन्द्रियाशया । नामरूपे भगवती प्रत्ययस्त्वमपाश्रयः ॥ यथा युवां त्रिलोकस्य वरदौ परमेष्ठिनौ । तथा म उत्तमश्लोक सन्तु सत्या महाशिषः ॥ इत्यभिष्टूय वरदं श्रीनिवासं श्रिया सह । तन्निःसार्योपहरणं दत्त्वाऽऽचमनमर्चयेत् ॥ ततः स्तुवीत स्तोत्रेण भक्तिप्रह्वेण चेतसा । यज्ञोच्छिष्टमवघ्राय पुनरभ्यर्चयेद्धरिम् ॥ पतिं च परया भक्त्या महापुरुषचेतसा । प्रियैस्तैस्तैरुपनमेत् प्रेमशीलः स्वयं पतिः ॥ [illegible] कर्म [illegible] ॥ स्त्री [illegible] व्रतमिदं बिभृयाद्विहन्यात्कवचन ॥ एतेन पूजाविधिना मासान् द्वादशहायनम् । नीत्वाऽथोपरमेत्साध्वी कार्तिके चरमेऽहनि ॥ श्वोभूतेऽप उपस्पृश्य कृष्णमभ्यर्च्य पूर्ववत् । पयः शृतेन जुहुयात् [illegible] ॥ [illegible] पतिरेव समाहितः । विष्णुव्रतमिदं बिभृयात् ... ततः

...मृजाः ॥ निमृयात्सर्वकर्माणि पत्न्या उच्चावचैरपि च । कृतमेकतरेणापि दम्पत्योरुभयोरपि ॥ पत्न्यां [illegible] या पतिरेतत्समाहितः । विष्णुव्रतमिदं बिभृयाद्विहन्यात्कवचन ॥ एतेन पूजाविधिना मासान् द्वादशहायनम् । नीत्वाऽथोपरमेत्साध्वी कार्तिके चरमेऽहनि ॥ श्वोभूतेऽप उपस्पृश्य कृष्णमभ्यर्च्य पूर्ववत् । पयःशृतेन जुहुयाच्चरुणा सह सर्पिषा ॥ पाकयज्ञविधानेन द्वादशैवाहुतीः पतिः । आशिषः शिरसाऽऽदाय द्विजैः प्रीतैः समीरिताः ॥ प्रणम्य शिरसा भक्त्या भुञ्जीत तदनुज्ञया ॥ आचार्यमग्रतः कृत्वा वाग्यतः सह बन्धुभिः । दद्यात्पत्न्यै चरोः शेषं सुप्रजास्त्वं सुसौभगम् ॥ एतच्चरित्वा विधिवद्व्रतं विभोरभीप्सितार्थं लभते पुमानिह । स्त्री त्वेतदास्थाय लभेत सौभगं श्रियं प्रजां जीवपतिं यशो गृहम् ॥ [illegible] महाभारते उद्योगपर्वणि १३२ अ. विदुलाख्यः तस्याः पुत्रेण सह संवादः पठनीयः विशेषतः सीमन्तोन्नयनसंस्कारसमये गर्भिणीभिः श्रवणीयः । कुन्त्याऽत्र [illegible] विदुलायाश्च संवादं पुत्रस्य च परंतप । ततः

[illegible] Pt. [illegible] Sharma Najafgarh Delhi Collection

 न्यासः । उत्थातव्यं जागृतव्यं योक्तव्यं भूतिकर्मसु । भविष्यतीत्येव मनः कृत्वासततमव्यथैः ॥ किं दुरापादनं तेषां पुंसामुद्दामचेतसाम् । यदाश्रितस्तीर्थपदश्चरणाव्यसनात्ययः ॥ मनु—नात्मानमवमन्येत पूर्वाभिरसमृद्धिभिः । आमृत्योर्यश्रियमन्विच्छेन्नैनां मन्येत दुर्लभाम् ॥ यद्दुष्करं यद्दुरापं यद्दुर्गं यच्च दुस्तरम् । तत्सर्वं तपसा साध्यं तपोहि दुरतिक्रमम् ।

दि.मा. घ.	प.	ति.	वा.	घ.	प.	समय	घं.	मि.	न.	घ.	प.	समय	घं.	मि.	यो.	घ.	प.	समय	घं.	मि.	क.	घ.	प.	घं.	मि.	क.	घ.	प.	घं.	मि.	योग	अं.	का.	व	क	रा	चन्द्रराशिसंचारः रा	घ.	प.	घं.	मि.	सूर्योदय		सूर्यास्त		र. क्रा. द.		चन्द्रोदय घं.	मि.
२६	८	१	सू.	४८	३२	रा	२	११	मृ.	३४	१८	रा.	२०	२९	शु.	४५	१३	रा.	०	५२	बा.	१८	४१	१४	१५	कौ.	४८	३२	२	११	सौम्य	१३	१३	२७	१	२२	मि.	३	५२	८	१९	६	४६	५	१४	२३	७	१७	३१
२६	७	२	च.	४९	३१	रा.	२	३५	आ.	३६	२४	रा.	२१	२०	शु.	४२	५२	रा.	२३	५६	तै.	१९	१	१४	२३	ग.	४९	३१	२	३५	का. द.	१४	१४	२८	२	२३						६	४७	५	१३	२३	११	१८	२९
२६	६	३	मं.	५१	४७	रा	३	३०	पुन.	३९	४६	रा	२२	४१	ब्र.	४१	३१	रा.	२३	२३	व.	२०	३९	१५	२	वि.	५१	४७	३	३०	सुस्थिर	१५	१५	२९	३	२४	क.	२३	५६	१६	२१	६	४७	५	१३	२३	१४	१९	२९
२६	६	४	बु.	५५	१४	रा.	४	५३	पु.	४४	१७	रा.	०	३०	ऐं.	४१	५	रा.	२३	१३	ब.	२३	३१	१६	११	बा.	५५	१४	४	५३	मातङ्ग	१६	१६	१	४	२५						६	४७	५	१३	२३	१७	२०	२५
२६	५	५	गु.	५९	३९	प्रा	६	३९	श्ले.	४९	४६	रा.	२	४१	वै.	४१	२५	रा.	२३	२१	कौ.	२७	२७	१७	४६	तै.	५९	३९	६	३९	अमृत	१७	१७	२	५	२६	सिं.	४९	४६	२	२१	६	४७	५	१३	२३	२०	२१	२४
२६	५	६	शु.	६०	०	स.	×	×	म.	५५	५६	प्रा.	५	९	वि.	४२	२१	रा.	२३	४४	ग.	३२	१२	१९	४०	व.	६०	०	×	×	कॉण	१८	१८	३	६	२७						६	४७	५	१३	२३	२३	२२	१२
२६	४	६	श.	४	४५	प्रा	८	४१	पू.	६०	०	स.	×	×	प्री.	४३	३७	रा.	०	१४	व.	४	४५	८	४१	वि.	३७	२७	२१	४६	लुम्ब	१९	१९	४	७	२८						६	४७	५	१३	२३	२४	२३	२
२६	४	७	सू.	१०	९	दि.	१०	५१	पू.	२	२५	प्रा.	७	४५	आ.	४४	५४	रा.	०	४५	ब	१०	९	१०	५१	बा.	४२	४६	२३	५४	छत्र	२०	२०	५	८	२९	क.	१९	१	१४	२३	६	४७	५	१३	२३	२५	२३	५३
२६	४	८	चं.	१५	२३	दि.	१२	५७	उ.	८	४६	दि.	१०	१८	सौ.	४५	५४	रा.	१	९	कौ.	१५	२३	१२	५७	तै.	४७	५४	१	५७	श्रीवत्स	२१	२१	६	९	३०						६	४७	५	१३	२३	२६	०	४३
२६	४	९	मं.	२०	२५	दि.	१४	५७	ह.	१५	१	दि.	१२	४८	शो.	४६	२२	रा.	१	२०	ग.	२०	२५	१४	५७	व.	५२	२१	३	४४	सौम्य	२२	२२	७	१०	१	तु.	४७	३५	१	४९	६	४७	५	१३	२३	२७	१	३६
२६	४	१०	बु.	२४	१७	दि.	१६	३०	चि.	२०	९	दि.	१४	५१	अ.	४६	५	रा.	१	१३	चि.	२४	१७	१६	३०	व.	५५	३८	५	२	का. द.	२३	२३	८	११	२						६	४७	५	१३	२३	२७	२	४१
२६	४	११	गु.	२६	५९	दि.	१७	३५	स्वा	२४	१०	दि.	१६	२७	सु.	४४	५५	रा.	०	४५	श.	२६	५९	१७	३५	कौ.	५७	४३	५	५२	सुस्थिर	२४	२४	९	१२	३						६	४७	५	१३	२३	२६	३	३०
२६	४	१२	शु.	२८	२६	प्रा.	१८	१०	वि.	२६	५९	दि.	१७	३५	धृ.	४२	४८	रा.	२३	५४	तै.	२८	२६	१८	१०	ग.	५८	३१	६	१२	मातङ्ग	२५	२५	१०	१३	४	वृ.	११	१७	११	१८	६	४७	५	१३	२३	२५	४	३१
२६	५	१३	श.	२८	३६	रा.	१८	१३	अ.	२८	३४	सा.	१८	१३	शू.	३९	४२	रा.	२२	४०	व.	२८	३६	१८	१३	वि.	५८	४	६	१	अमृत	२६	२६	११	१४	५						६	४७	५	१३	२३	२३	५	३४
२६	५	१४	सू.	२७	३१	रा.	१७	४८	ज्ये.	२८	५६	सा.	१८	२१	गं.	३५	३८	रा.	२१	१२	ग.	२७	३१	१७	४८	न.	५६	२३	५	२०	कॉण	२७	२७	१२	१५	६	ध.	२८	५६	१८	२१	६	४७	५	१३	२३	२१		
२६	५	३०	चं.	२५	१५	रा.	१६	५३	मू.	२८	१०	सा.	१८	३	वृ.	३०	४०	सा.	१९	३	ना.	२५	१५	१६	५३	कि.	५३	३६	४	१३	लम्ब	२८	२८	१३	१६	७						६	४७	५	१३	२३	१९		

श्रीशुभसंवत् २०२७ शकः १८९२ पौषकृष्णपक्षः (दिसम्बर ता. १३···२८, सन् १९७०) याम्यायनं, याम्यगोलः, हेमन्तर्तुः ।

इष्टिः । पुंसवनसीमन्तोन्नयनप्रसूतिकास्नानभैषज्यसेवनधान्यच्छेदनादि मु० । स्वा. २ च. कुजः ५६।५ ।
पुनर्वसौ रात्रिशेषे सामान्यशुभकर्मणां मुहूर्तोऽवधेयः । यायिजयप्रदयोगश्च । स्वा. ३ च. शुक्रः २।५७ ।
भ. २०।३१ (दि. १५।२) उ. ५१।४७ (रा. ३।३०) या. । विष्टेः पूर्वं पुंसवनसीमन्तोन्नयनसुभगेतररक्तवस्त्रधारणदक्षिणदिग्गमनादि मु० । चतुर्थ्यां* गणेश ४ व्रतम् । मले धनुषिचार्कः २।३८ मु. ३० फल समम् । संक्रान्तिदोषाच्छुभकर्ममुहूर्त्ताभावः ।
रात्रिशेषे वैधृतेःपरं धान्यच्छेदनकणमर्दनासवारिष्टनिर्माणादि मु. । *स्थायीजयद योगः । केन्द्रांशवशेनवक्रीबुधः ५५।१७ ।
अद्य धान्यच्छेदनकणमर्दनासवारिष्टनिर्माणादिकृते शोभनकालः । स्वा. ४ च. शुक्रः ११।३५ । ‡ विशाखा भे शुक्रः ५।३ ।
भ. ४।४५ (प्रा. ८।४१) उ. ३७।२७ (रा. २१।४६) या. । विष्टेःपरं विक्रयः शुभः । मू. २ च. रविः १८।१३ । स्वा. ३ च. कुजः १६।२८ ।
सप्तम्युत्तरायोगे प्रसूतिकास्नानशिशोस्ताम्बूलभक्षणनौकाघट्टनधान्यच्छेदनकणमर्दनसुभगेतरनववस्त्रधारणादि मु. ।
श्री मालवीयजयन्ती । अष्टम्यामृतुमतीस्नानलतावृक्षादिरोपण मु. । † बुधः १७।१७ । अनु. २ च. गुरुः ५७।२ ।
भ. ५२।२१ (रा. ३।४४) उ. । **राष्ट्रीय पौषारम्भः** । तिथिदानात् हस्ते शुभकर्मणां मुहूर्तोऽवधेयः । **मकरेदृश्यार्कः** १३।१७ मू. ३ च. रविः ३३।४१ ।‡
भ. २४।१७ (दि. १६।३०) या. । विष्टेः परं सूतिकास्नानौषधसेवनशिशोस्ताम्बूलभक्षणभैषज्यसेवनधान्यच्छेदनकणमर्दनादि मु. । मू. ४ च. वक्री†
सफला ११ एकादशी व्रतं सर्वेषाम् । स्वात्यां जातकर्मनामकरणान्नप्राशनशिशोस्ताम्बूलभक्षणभैषज्यसेवननववस्त्रभूषाधारणादि मु. । स्वा. ४ च कुजः ३७।७ ।
त्रयोदश्यां सूतिकास्नानौषधसेवनभैषज्यसेवननववस्त्रभूषाधारणपश्चिमेतरसर्वदिग्गमनविपणिव्यापारादि मु । मू. ४ च. रवि ४९।६ विशा. २ च. शुक्रः§
भ. २८।३६ (सा. १८।१३) उ. ५८।४ (प्रा. ६।१) या. । **शनिप्रदोषः** । **मासशिवरात्रिः** । मैत्रे पूर्वेतरसर्वदिग्यात्रा शुभा ।
दोषाधिक्याच्छुभकर्ममुहूर्त्ताभावः । मू. ३ च. वक्रीबुधः ३४।५६ । §४६।४८ । **घनिष्ठा ४ च. राहु, मघा २ च. च केतुः १६।१२ ।**
स्नानदानश्राद्धादौ सोमवती अमा ३० । प्रतिपदि सामान्यशुभकर्मणां मुहूर्त्तोऽवधेयः ।

§सत्यपराक्रमम् ॥ अन्योऽपि सन्तानगोपालमन्त्रः । ॐ क्लीं देवकीसुत गोविन्द वासुदेवजगत्पते। देहि मे तनयं कृष्ण त्वा महं शरणं गतः क्लीं ॐ । अश्वत्थपत्रे अष्टदलकमलं रक्तचन्दनेन निर्माय सम्पूज्य सपादलक्षं मंत्रं ब्रह्मचर्यव्रतं धृत्वा जपतः सत्पुत्राप्तिः ॥ कुण्डल्यां रव्यादिग्रहाणां बाधकत्वे तत्तद्दोषोपशान्त्युपायाश्च कर्तव्याः । हरिवंशो रविणा शशी त्रिपुरहा भौमे च रुद्री क्रिया सौम्ये सम्पुटकांस्यपात्रविधिवज्जीवे च पैत्रीं तिथिः । शुक्रे गोप्रतिपालनं च कथितं मन्दे च मृत्युञ्जयः कन्यादानभुजङ्गकेतुकपिलासन्तानसौख्यप्रदा ॥ बुधशुक्रकृते दोषे सुताप्तिः शिवपूजनात् । गुरुचन्द्रकृते दोषे मन्त्रयन्त्रौषधेर्बलात् ॥ शेष २९ पृष्ठे§

विवाह मुहूर्त्ताः

ति. १ रवौ-मृगे ।।।ऽऽऽ।।।। रे
७ ज. गोधूलिः ।

अतः परं धनुष्यर्कदोषसत्त्वाच्छुभकर्म मुहूर्त्ताभावः ।

दैनिक लग्नसारिणी

लग्न	म.	प्र.	वृ.	प्र.	मि.	प्र.	क.	प्र.	सिं.	प्र.	क.	प्र.	तु.	प्र.	वृ.	प्र.	ध.	प्र.	म.	प्र.	कु.	प्र.	मी.	प्र.
१सू.	१३	५६	१५	३४	१७	३०	१९	४३	२२	१	०	१५	२	२८	४	४४	७	१	९	७	१०	५३	१२	२५
२च.	१३	५२	१५	३०	१७	२६	१९	३९	२१	५७	०	११	२	२४	४	४०	६	५७	९	३	१०	४९	१२	२१
३मं.	१३	४७	१५	२५	१७	२१	१९	३४	२१	५२	०	६	२	१९	४	३५	६	५२	८	५८	१०	४४	१२	१६
४बु.	१३	४२	१५	२०	१७	१६	१९	२९	२१	४७	०	१	२	१४	४	३०	६	४७	८	५३	१०	३९	१२	११
५बृ.	१३	३८	१५	१६	१७	१२	१९	२५	२१	४३	२३	५७	२	१०	४	२६	६	४३	८	४९	१०	३५	१२	७
६शु.	१३	३४	१५	१२	१७	८	१९	२१	२१	३९	२३	५३	२	६	४	२२	६	३९	८	४५	१०	३१	१२	३
६श.	१३	२९	१५	७	१७	३	१९	१६	२१	३४	२३	४८	२	१	४	१७	६	३४	८	४०	१०	२६	११	५८
७सू.	१३	२५	१५	३	१६	५९	१९	१२	२१	३०	२३	४४	१	५७	४	१३	६	३०	८	३६	१०	२२	११	५४
८चं.	१३	२०	१४	५८	१६	५४	१९	७	२१	२५	२३	३९	१	५२	४	८	६	२५	८	३१	१०	१७	११	४९
९मं.	१३	१६	१४	५४	१६	५०	१९	३	२१	२१	२३	३५	१	४८	४	४	६	२१	८	२७	१०	१३	११	४५
१०बु.	१३	११	१४	४९	१६	४५	१८	५८	२१	१६	२३	३०	१	४३	३	५९	६	१६	८	२२	१०	८	११	४०
११बृ.	१३	७	१४	४५	१६	४१	१८	५४	२१	१२	२३	२६	१	३९	३	५५	६	१२	८	१८	१०	४	११	३६
१२शु.	१३	२	१४	४०	१६	३६	१८	४९	२१	७	२३	२१	१	३४	३	५०	६	७	८	१३	९	५९	११	३१
१३श.	१२	५८	१४	३६	१६	३२	१८	४५	२१	३	२३	१७	१	३०	३	४६	६	३	८	९	९	५५	११	२७
१४सू.	१२	५३	१४	३१	१६	२७	१८	४०	२०	५८	२३	१२	१	२५	३	४१	५	५८	८	४	९	५०	११	२२
३०चं.	१२	४९	१४	२७	१६	२३	१८	३६	२०	५४	२३	८	१	२१	३	३७	५	५४	८	०	९	४६	११	१८

ति. १२ [illegible]-कुजचन्द्रयुतिः द.घ. १४।२८ चन्द्राद्दक्षिणे । अत्रैव शुक्रचन्द्रयुतिः र.घ. ६।३७ चन्द्राद्दक्षिणे ।
ति. १२ [illegible]-गुरुचन्द्रयुतिः दि. घ. १८।१८ चन्द्राद्दक्षिणे ।
ति. ३ [illegible]चन्द्रयुतिः दि. घं. १६।४२ चन्द्राद्दक्षिणे ।

मिश्रमानकालिका दैनिक स्पष्टग्रहास्तत्र दिनद्वयग्रहान्तरं गतिः

मि.मा		स्प. सू.				स्प. चं.				स्प. मं.				स्प. बु.				स्प. बृ.				स्प. शु.				स्प. श.				स्प. रा.				स्प. के.			
४४	२८	७	२७	३८	४७	२	८	५०	४९	६	९	५२	४५	८	१५	२५	२६	७	४	३०	३१	६	१३	५	४६	०	१६	३७	०	१०	७	१६	४०	४	७	१६	४०
४४	२७	७	२८	४०	५	२	२१	४१	२२	६	१०	३०	१३	८	१५	३८	४३	७	४	४३	२४	६	१३	५२	[illegible]	०	१६	३३	४५	१०	७	१३	२९	४	७	१३	२९
४४	२५	७	२९	४१	२३	३	४	१७	३७	६	११	७	४०	८	१५	४५	५४	७	४	५६	१४	६	१४	३९	४९	०	१६	३०	३५	१०	७	१०	१८	४	७	१०	१८
४४	२४	८	०	४२	४१	३	१६	४१	१६	६	११	४५	६	८	१५	४७	१७	७	५	९	०	६	१५	२८	०	०	१६	२७	३१	१०	७	७	७	४	७	७	७
४४	२२	८	१	४४	२	३	२८	५४	३९	६	१२	२२	३१	८	१५	४१	४	७	५	२१	४४	६	१६	१७	११	०	१६	२४	३२	१०	७	३	५७	४	७	३	५७
४४	२१	८	२	४५	२२	४	११	०	३९	६	१२	५९	५७	८	१५	२९	२८	७	५	३४	२७	६	१७	७	२६	०	१६	२१	३८	१०	७	०	४६	४	७	०	४६
४४	१९	८	३	४६	४२	४	२३	२	३०	६	१३	३७	२२	८	१५	११	२५	७	५	४७	७	६	१७	५७	३२	०	१६	१८	५२	१०	६	५७	३५	४	६	५७	३५
४४	१८	८	४	४८	३	५	५	४	०	६	१४	१४	४८	८	१४	४७	१५	७	५	५९	४५	६	१८	४९	२६	०	१६	१६	१३	१०	६	५४	२४	४	६	५४	२४
४४	१७	८	५	४९	२५	५	१७	९	२	६	१४	५२	१२	८	१४	१७	२१	७	६	१२	१९	६	१९	४१	३१	०	१६	१३	३९	१०	६	५१	१४	४	६	५१	१४
४४	१५	८	६	५०	४९	५	२९	२०	५७	६	१५	२९	३७	८	१३	४२	१०	७	६	२४	५२	६	२०	३४	३९	०	१६	११	१०	१०	६	४८	३	४	६	४८	३
४४	१४	८	७	५२	१२	६	११	४२	४०	६	१६	७	१	८	१३	१	५५	७	६	३७	२१	६	२१	२८	२२	०	१६	८	४९	१०	६	४४	५२	४	६	४४	५२
४४	१३	८	८	५३	३५	६	२४	१६	३९	६	१६	४४	२६	८	१२	१८	३४	७	६	४९	४७	६	२२	२२	३२	०	१६	६	३३	१०	६	४१	४१	४	६	४१	४१
४४	१२	८	९	५४	५९	७	७	४	३९	६	१७	२१	४९	८	११	३१	४०	७	७	२	१०	६	२३	१७	३६	०	१६	४	२५	१०	६	३८	३१	४	६	३८	३१
४४	११	८	१०	५६	२४	७	२०	७	५१	६	१७	५९	१३	८	१०	४२	३४	७	७	१४	३०	६	२४	१२	५८	०	१६	२	२४	१०	६	३५	२०	४	६	३५	२०
४४	१०	८	११	५७	४८	८	३	२६	३७	६	१८	३६	३५	८	९	५२	१६	७	७	२६	४७	६	२५	९	६	०	१६	०	२८	१०	६	३२	९	४	६	३२	९
४४	९	८	१२	५९	१४	८	१७	०	३३	६	१९	१३	५६	८	९	१	५६	७	७	३९	१	६	२५	[illegible]	४७	०	१५	[illegible]	४०	१०	६	२८	५८	४	६	२८	५८

ति. ४ बुधे



ति. १० बुधे



पूर्वपृष्ठेऽयमारब्धः । विश्रुता राजसंसत्सु श्रुतवाक्या बहुश्रुता । विदुला नाम राजन्या जगर्हे पुत्रमौरसम् । निर्जितं सिन्धुराजेन शयानं दीनचेतसम् ॥ विदुलोवाच—अनन्दन समाजात द्विषतां हर्षवर्द्धन । न मयात्वं च पित्रा च जातः क्वाभ्यागतोह्यसि ॥ निर्मन्युश्चाप्यसंख्येयः पुरुषः क्लीबसाधनः । यावज्जीवं निराशोऽसि कल्याणाय धुरं वह । मात्मानमवमन्यस्व मैनमल्पेन बीभर । मनः कृत्वा सुकल्याणं मा भैस्त्वं प्रति संहर ॥ उत्तिष्ठ हे कापुरुष मा शेष्वैवं पराजितः । अमित्रान्नन्दयन् सर्वान्निर्मानो बन्धुशोकदः ॥ सुपूरा वै कुनदिका सुपूरो मूषिकाञ्जलिः । सुसंतोषः कापुरुषः स्वल्पकेनैव तुष्यति ॥ त्वमेवप्रेतवच्छेदे कस्माद्वज्रहतो यथा । उत्तिष्ठ हे कापुरुष मा स्वाप्सीः शत्रुनिर्जितः अलातं तिन्दुकस्यैव मुहूर्तमपि हि ज्वल । मा तुषाग्निरिवानर्च्चिर्धूमायस्व जिजीविषुः ॥ विदुलोवाच—कुरुवा मानुष्यकं कर्म सृत्वाजि यावदुत्तमम् । धर्मस्यानृण्यमाप्नोति न चात्मानं विगर्हते । उद्भावयस्व वीर्यं वा तां वा गच्छ ध्रुवां गतिम् । धर्मपुत्राग्रतः कृत्वा किं निमित्तं हि जीवसि । इष्टापूर्तं हि ते क्लीब कीर्तिश्च सकला हता । विच्छिन्नं भोगमूलं ते किं निमित्तं हि जीवसि ॥ शत्रुर्निमज्जता ग्राह्यो जंघायां प्रपतिष्यता । विपरिच्छिन्नमूलोऽपि न विषीदेत् कथञ्चन ॥ उद्यम्य धुरमुत्कर्षे दाजानेयकृतं स्मरन् । कुरु सत्वञ्च मानञ्च विद्धि पौरुषमात्मनः । उद्भावय कुलं मग्नं त्वत्कृते स्वयमेव हि ॥ यस्य वृत्तं न जल्पन्ति मानवा महदद्भुतम् । राशिवर्द्धनमात्रं सः नैव स्त्री न पुनः पुमान् ॥ दाने तपसि सत्ये च यस्य नोच्चरितं यशः । विद्यायामर्थलाभे वा मातुरुच्चार एव सः । श्रुतेन तपसा वाऽपि श्रिया वा विक्रमेण वा । जनान् योऽभिभवत्यन्यान् कर्मणा हि स वै पुमान् ॥ न त्वेव जाल्मीं कापालीं वृत्तिमेषितुमर्हसि । नृशंस्यामयशस्याञ्च दुःखां कापुरुषोचिताम् ॥ अवलुकारिणं सत्सु कुलवंशस्य नाशनम् । कलिं पुत्रप्रवादेन संजय त्वा मजीजनम् ॥ निरामर्षं निरुत्साहं निर्वीर्यमरिनन्दनम् ॥ मा स्म सीमन्तिनी काचित् जनयेत्पुत्रमीदृशम् ॥ मा धूमाय ज्वलात्यन्तमाक्रम्य जहि शात्रवान् । ज्वल मूर्द्धन्यमित्राणां मुहूर्तमपि वा क्षणम् । एतावानेव पुरुषो यदमर्षी यदक्षमी । क्षमावान् निरमर्षश्च नैव स्त्री न पुनः पुमान् ॥ सन्तोषो वै श्रियं हन्ति तथाऽनुक्रोश एव च । अनुत्थानभये चोभे निरीहो नाश्नुते महत् ॥ एभ्यो निकृतिपापेभ्यः प्रमुञ्चात्मानमात्मना । आयसं हृदयं कृत्वा मृगयस्व पुनः स्वकम् ॥ पुरं विषहते यस्मात् तस्मात् पुरुष उच्यते । तमाहुर्व्यर्थनामानं स्त्रीवद् य इह जीवति ॥ स्वबाहुबलमाश्रित्य योऽभ्युज्जीवति मानवः । स लोके लभते कीर्तिं परत्र च शुभां गतिम् ॥ जहि शत्रून् रणे राजन् स्वधर्ममनुपालय । मा त्वादृशं सुकृपणं शत्रूणां भयवर्द्धनम् । अस्मदीयैश्च शोचद्भिर्नदद्भिश्च परैर्वृतम् । अपि त्वां नानुपश्येयं दीना दीनमिव स्थितम् ॥ युवा रूपेण संपन्नो विद्ययाभिजनेन च । यस्त्वादृशो विकुर्वीत यशस्वी लोकविश्रुतः । अनड्वानिव बोढव्यो मन्ये मरणमेव तत् ॥ यदि त्वामनुपश्यामि परस्य प्रियवादिनम् । पृष्ठतोऽनुव्रजन्तं वा का शान्तिर्हृदयस्य मे ॥ अकुर्वन्तो हि कर्माणि कुर्वन्तो निन्दितानि च । सुखं नैवेह नामुत्र लभन्ते पुरुषाधमाः ॥ [illegible] सृष्टः संग्रामे जयाय च । [illegible] वा प्राप्ताकीर्तिसंशोकलम् ॥ मङ्गलानि पुरस्कृत्य ब्राह्मणांश्चेश्वरैः सह ॥ यदैव शत्रुर्जानीयात्सपत्नं त्यक्तजीवितम् । तदैवास्मादुद्विजते सर्पाद्वेश्म गतादिव ॥ यद्येतत् संविजानासि यदि सम्यग्ब्रवीम्यहम् । कृत्वा सौम्यमिवात्मानं जयायोत्तिष्ठ सञ्जय ॥ कुन्त्युवाच । ॥ राजन्नेव स क्षिप्तः प्रणुन्नो वाक्यसायकैः । [illegible] तथा सर्वं यथावदनुशासनम् । इदमुद्धर्षणं भीमं तेजोवर्धनमुत्तमम् । राजानं श्रावयन्मंत्री सीदन्तं शत्रुपीडितम् ॥ [illegible] नामेतिहासोयं श्रोतव्यो विजिगीषुणा । महीं विजयते क्षिप्रं श्रुत्वा शत्रुंश्च मर्दति ॥ पुंसवनञ्चैव वीरा जननमेव च । अभीक्ष्णं गर्भिणी श्रुत्वा ध्रुवं वीरं प्रजायते ॥ विद्याशूरं तपःशूरं दानशूरं [illegible] । ब्राह्म्या श्रिया दीप्यमानं साधुवादे च सम्मतम् । अर्चिष्मन्तं बलोपेतं महाभागं महारथम् । धृतिमन्तमनाधृष्यं [illegible] पराजितम् । नियन्तारमसाधूनां गोप्तारं धर्मचारिणाम् । ईदृशं क्षत्रिया सूते वीरं ॥§

Digitized by Sarayu Trust Foundation, Delhi and eGangotri.Funding by MoE-IKS

ता.	ति.	वा.	घ. प.	नक्षत्र	घं. मि.	यो.	घ. प.	क.	घं. मि.	क.	घ. प.	घं. मि.	यो.	घ. प.	घं. मि.	क.	घ. प.	घं. मि.	घ. प.	घं. मि.	योगः	अं.	का.	बं.	फ.	रा.	चन्द्रराशिसञ्चारः रा. घ. प. घं. मि.	पूर्योदय	पूर्यास्त	र. का. द.	चन्द्रास्त घं. मि.
२६	१	श.	२१।१८	दि.	१५।३४	पू.	२६।२३	सा.	१७।२०	ध्रु.	२४।५३	१६।४४	व.	२१।५८	१५।३४	गा.	४१।५१	२।४३			मित्र	२९	२९	१३	१७	८	म. ४०।४४।२३ ४	६।४७	५।२३	२३।१८	१८।१७
[illegible]																					वज्र										१९।२५
[illegible]																					केतु						कुं. ४८।२९ २।१०				२०।३१
[illegible]																					धाता										२१।३७
[illegible]																					आनन्द						मी. ५४।१६ ४।२९				२२।३९
[illegible]																					चर										२३।४१
[illegible]																					गद										०।४३
[illegible]																					शुभ						मे. ०।२८ ६।५७				१।४५
[illegible]																					कोण										२।४७
[illegible]																					लम्ब						वृ. ९।२२ १०।३०				३।५१
[illegible]																					मत्र										४।५२
[illegible]																					वज्र						मि. २२।५४ १५।१४				५।४९
[illegible]																					ध्वांक्ष										× ×
[illegible]																					धम्र						क. ४२।२० २३।४०				× ×

श्रीशुभसंवत् २०२७ शाकः १८९२ पौषशुक्लपक्षः (दिसम्बर ता. २८···३१, जनवरी ता० १···११ सन् १९७१) याम्यायनम्, याम्यगोलः, हेमन्तर्तुः ।

इष्टिः । चन्द्रदर्शनम्, मु. ३० फलं समम् । अद्योत्तरायां प्रसूतिकास्नानसुभगेतररक्तवस्त्रधारणपूर्वदिग्गमनादि मु. । पूर्वाषाढायामर्कः ४।२३। विशाखायां कुजः ५८।८। विशा. ३च.शुक्रः२०।२३।

जिकअट् ११ । जातकर्मनामकरणान्नप्राशनभूम्युपवेशनखट्वारोहणशिशोस्ताम्बूलभक्षणनववस्त्राभूषाधारणलतावृक्षादिरोपण मु. । *मु. । पू. षा. २ च. वक्री बुधः ४६।५६ ।

भ. ३९।५१ (रा. २२।४३) उ. । वैनायकी ४ । पञ्चकारम्भः ४८।२९ (रा. २।१०) । तृतीयायां पुंसवनसीमन्तोन्नयनाजातकर्मनामकरणान्नप्राशनभैषज्यसेवनधान्यच्छेदनकणमर्दनादि*

भ. ७।९ (दि. ९।३८) या. । पञ्चम्यां सूतिकाक्वाथपथ्यौषधसेवनजातकर्मनामकरणान्नप्राशनशिशोस्ताम्बूलभक्षणधान्यच्छेदनगोक्रयविक्रयादि मु. । पू. षा. २ च. रविः १९।४३ ।†

अद्य तिथिक्षयव्यतिपातदोषसत्त्वाच्छुभकर्ममुहूर्त्ताभावः । †विशाः ४ च. वृश्चिके च शुक्रः ४६।२८ ।

भ. ४९।४२ (रा. २।३९) उ. । सप्तम्यामुत्तरायोगे पुंसवनसीमन्तोन्नयनप्रसूतिकास्नानसुभगेतरनववस्त्रधारणोत्तरदिग्गमनादि मु. ।

भ. १६।५५ (दि. १३।३२) या. । विष्टेः परं सूतिकापथ्यौषधसेवनभैषज्यभक्षणलतावृक्षारोपणगोक्रयविक्रयादि मु. । पू. षा. ३ च. रविः ३५।१ । विशा. २ च. कुजः १९।२३ ।

पञ्चकनिवृत्तिः ०।२८ (प्रा. ६।५७) । अद्य दशम्यामुत्तराम्बिहायान्यदिग्गमने लग्नमनुसन्धेयम् । अनुराधा भे शुक्रः ८।५ ।

भरण्यां नवशय्यासनादेर्भोगः शुभावहः ।

भ. २।४५ (प्रा. ७।५१) उ. ३०।५६ (सा. १९।८) या. । पुत्रदा ११ एकादशी व्रतं सर्वेषाम् । विष्टेः पूर्वं धान्यच्छेदनविक्रयादि मु. । पू. षा. ४ च. रविः ५०।२२ । केन्द्रांशवशेन‡

त्रयोदश्यां विविध शुभकर्मणां कृते शोभनकालः । अनु. २ च. शुक्रः २३।५५ ।

शनिप्रदोषः । दक्षिणदिग्गमने दिग्द्वारानुगं लग्नमनुसन्धेयम् । विशा. ३ च. कुजः ४१।११ । अनु. ३ च. गुरु. ३९।४८ ।

भ. २६।५४ (सा. १७।३०) उ. ५७।२४ (प्रा. ५।४२) या. । दोषाधिक्यात्र शुभाऽर्हः समयः । उत्तराषाढायामर्कः ५।४७ ।

व्रतस्नानदानादौ पूर्णिमा १५ पुण्यतमा । शाकम्भरी जन्म । माघस्नानदानयमनियमाद्यारम्भः । माघे प्रत्यहमरुणोदये विशिष्टतीर्थे तदभावे देवनद्यादौ स्नान फलाधिक्यम् । अद्य शुभकर्मणि§

‡मार्गीबुधः ३६।३८ ।

§वैधृतिदोषोऽवधेयः । अनु. ३ च. शुक्रः ३६।९ ।

§सर्वदोषविनाशाय सन्तान हरिपूजनम् । कुर्याद् भीमव्रतं चापि कामदेवव्रतं नरः । अथ गया-श्राद्ध-कालः ॥ कार्मुककुम्भे-मीनमेषस्थिते सूर्ये कन्यायां कार्मुके घटे दुर्लभं त्रिषु लोकेषु गयायां पिण्डपातनम् । मकरे वर्तमाने च ग्रहणे चन्द्रसूर्ययोः । दुर्लभं त्रिषु लोकेषु गयायां पिण्डपातनम् ॥ गयायां सर्वलोकेषु पिण्ड दद्याद्विचक्षणः । अधिमासे जन्मदिन अस्ते च गुरुशुक्रयोः । न त्यक्तव्यं गया-श्राद्धं सिंहस्थे च बृहस्पतौ ।

दैनिक लग्नसारिणी

वार	[illegible]
१मं.	[illegible]
२बु.	[illegible]
३बृ.	[illegible]
४शु.	[illegible]
५श.	[illegible]
६र.	[illegible]
७सो.	[illegible]
८मं.	[illegible]
९बु.	[illegible]
१०बृ.	[illegible]
११शु.	[illegible]
१२श.	[illegible]
१३र.	[illegible]
१४सो.	[illegible]
१५मं.	[illegible]

मिश्रमानकालिका दैनिक स्पष्टग्रहास्तत्र दिनद्वयग्रहान्तरं गतिः

स.	सू.	सू. गति	चं.	चं. गति	मं.	मं. गति	बु.	बु. गति	बृ.	बृ. गति	शु.	शु. गति	श.	श. गति	रा.	के.
[illegible]																

तिथि ४ शुक्रे



तिथि ११ शुक्रे



शक्रनीतौ अग्निदो गरदश्चैव शस्त्रोन्मत्तो धनापहः । क्षेत्रदारहरश्चैतान् षड्विद्यादाततायिनः ॥ कृष्णः अर्जुनं प्रति भीष्मपर्वणि-जहि भीष्मं स्थिरो भूत्वा शृणु चेदं वचो मम । यथोवाच पुरा शक्रं महाबुद्धिर्बृहस्पतिः ॥ ज्यायांसमपि चेद्वृद्धं गुणैरपि समन्वितम् । आततायिनमायान्तं हन्याद् घातकमात्मनः ॥ शाश्वतोऽयं स्थितो धर्मः क्षत्रियाणां धनञ्जय । योद्धव्यं रक्षितव्यञ्च यष्टव्यं चानसूयिभिः ॥ यावताऽऽत्मनः परेषां वा रक्षा भवेत तावानेव प्रहारः करणीयः आवश्यकतायामाततायिनः प्राणवधोऽपि विहितः । क्षात्रधर्म प्रशंसा । भीष्मं युधिष्ठिरं प्रति—प्रत्यक्षं सुखभूयिष्ठमात्मसाक्षिक मच्छलम् । सर्वलोकहितं धर्मं क्षत्रियेसु प्रतिष्ठितम् ॥ आत्मत्यागः सर्वभूतानुकंपा लोकज्ञानं पालनं मोक्षणञ्च । विषण्णानां मोक्षणं पीडितानां क्षात्रे धर्मे विद्यते पार्थिवानाम् । एवं वीर्यः सर्वधर्मोपपन्नः क्षात्रः श्रेष्ठः सर्वधर्मेषु धर्मः । पाल्यो युष्माभिर्लोकहितैरुदारैर्विपर्यये स्यात्तदभावः प्रजानाम् । त्यागं श्रेष्ठं मुनयो वै वदन्ति सर्वं श्रेष्ठं यच्छरीरं त्यजेत् ॥ शा. ७८ अ. । ब्राह्मणस्त्रिषु वर्णेषु शस्त्रं गृह्णन् न दुष्यति । एवमेवात्मनस्त्यागान्नान्यं धर्मं विदुर्जनाः ॥ तेभ्यो नमश्च भद्रञ्च ये शरीराणि जुह्वते । ब्रह्मद्विषो नियच्छन्तस्तेषां नोऽस्तु सलोकता ॥ ब्रह्मलोकजितः स्वर्ग्यान् वीरांस्तान् मनुरब्रवीत् ॥ यथाश्वमेधावभृथे स्नाताः पूता भवन्त्युत । दुष्कृतस्य प्रणाशश्च तथा शस्त्रहता रणे ॥ भवत्यधर्मो हि धर्माधर्मावुभावपि । कारणाद्देशकालस्य देशकालः स तादृशः । मैत्राः क्रूराणि कुर्वन्तो जयन्ति स्वर्गमुत्तमम् । धर्म्याः पापानि कुर्वाणो गच्छन्ति परमां गतिम् ॥ ब्राह्मणस्त्रिषु लोकेषु शस्त्रं गृह्णन्न दुष्यति । आत्मत्राण वर्णदोषे दुर्दम्यनियमेषु च । युधिष्ठिर उवाच—अभ्युत्थिते दस्युबले क्षत्रार्थे वर्णसंकरे । सम्प्रमूढेषु क्षत्रेषु यद्यन्योऽभि भवेद्बली । ब्राह्मणो यदि वा वैश्यः शूद्रो वा राजसत्तम । दस्युभ्योऽथ प्रजा रक्षेद्दण्डं धर्मेण धारयन् ॥ कार्यं कुर्यान्न वा कुर्यात् स वार्यो वा भवेन्न वा ॥ भीष्म उवाच । अपारे यो भवेत् पारमप्लवे यः प्लवो भवेत् ॥ शूद्रो वा यदि वाप्यन्यः सर्वथा मानमर्हति । यमाश्रित्य नरा राजन् वर्तयेयुर्यथासुखम् । अनाथाः परिपाल्यन्तो दस्युभिः परिपीडिताः । तमेव पूजयेयुस्ते प्रीत्या स्वमिव बान्धवम् । अभीक्ष्णं कौरव्य कर्ता सम्मानमर्हति ॥ गोब्राह्मणहितार्थञ्च वर्णानां संकरेषु च । वैश्यो गृह्णीत शस्त्राणि परित्राणार्थमात्मनः । अथ मानसतीर्थे स्नानस्यमाहात्म्यमाह—काशीखण्डे । सत्यं तीर्थं क्षमा तीर्थं तीर्थमिन्द्रियनिग्रहः । सर्वभूतदयातीर्थं सर्वमार्जवमेव च ॥ दानतीर्थं दमस्तीर्थं सन्तोषस्तीर्थमुच्यते । ब्रह्मचर्यं परं तीर्थं तीर्थञ्च प्रियवादिता ॥ ज्ञानतीर्थं धृतिस्तीर्थं पुण्यतीर्थमुदाहृतम् । तीर्थानामपि तत्तीर्थं विशुद्धिर्मनसः परा ॥ अनुशा. १०८ अ.-आगाधे विमले शुद्धे सत्यतोये धृतिह्रदे । स्नातव्यं मानसे तीर्थे सत्त्वमालम्ब्य शाश्वतम् । तीर्थशौचमनर्थित्वमार्जवं सत्यम् र्दवम् । अहिंसा सर्वभूतानामानृशंस्यं दमः शमः । नोदकक्लिन्नगात्रस्तु स्नात इत्यभिधीयते । स स्नातो यो दमः स्नातः स बाह्याभ्यन्तरः शुचिः ॥ बलाशौच मनः शौचं तीर्थशौचमतः परम् । ज्ञानोत्पन्नं च यच्छौचं तच्छौचं परमं मतम् । मनसा च प्रदीप्तेन ब्रह्मज्ञानजलेन च । स्नाति यो मानसे तीर्थे तत् स्नानं तत्त्वदर्शिनाम् ॥ सर्वेषामेव शौचानामर्थशौचं परं स्मृतम् । योऽर्थे शुचिर्हि स शुचिर्न मृद्वारिशुचिः शुचिः ॥ शरीरस्यानि तीर्थानि प्रोक्तान्येतानि भारत । पृथिव्यां यानि तीर्थानि पुण्यानि तान्यपि ॥ शरीरस्य यथोद्देशाः शुचयः परिकीर्त्तिताः । तथा पृथिव्य भागाश्च पुण्यानि सलिलानि च ॥ कीर्तनाच्चैव तीर्थस्य स्नानाच्च पितृतर्पणात् । धुनन्ति पापं तीर्थेषु ते प्रयान्ति सुखं दिवम् ॥ परिग्रहाच्च साधूनां पृथिव्याश्चैव तेजसा । अतीव पुण्यभागास्ते सलिलस्य च तेजसा ॥ मनसश्च पृथिव्याश्च पुण्यास्तीर्थास्तथापरे । उभयोरेव यः स्नायात् स सिद्धिं शीघ्रमाप्नुयात् ॥ यथा बलं क्रिया हीनं क्रिया वा बलवर्जिता । नेह साधयते कार्यं समायुक्ता तु सिद्ध्यति ॥ एवं शरीरशौचेन चान्वितः । शुद्धिः सिद्धिमवाप्नोति ... शुभः । तिलाः देयाश्च विप्रेभ्यो सर्वदेवोत्तरायणे । तिलतैलेन दीपाश्च देयाः शिवगृहे शुभाः होमं तिलैः प्रकुर्वीत सर्वदेवोत्तरायणम् ।

दिविसं सौभाग्यम् । अथ माघकृष्ण २ गुरौ मकर संक्रान्ति ...

ति. १० बुधे-शनिचन्द्रयुतिः रे. घं० १९।३८ शनिर्दक्षिणे ।

CC-0 In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

शनिवार प्रात: ६-१५ परजन्म पुत्र अमरसिंह सौतमपुर

Digitized by Sarayu Trust Foundation, Delhi and eGangotri.Funding by MoE-IKS

३० आपो अस्मान्मातरः शुन्धयन्तु ॥ यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् । विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते ॥ प्रतिग्रहादपावृत्तः संतुष्टो येन केनचित् । अहङ्कारनिवृत्तश्च स तीर्थफलमश्नुते ॥ अकल्कको निरारम्भो लघ्वाहारी जितेन्द्रियः । विमुक्तः सर्वपापेभ्यः स तीर्थफलमश्नुते ॥ अक्रोधनश्च राजेन्द्र सत्यशीलो दृढव्रतः । आत्मोपमश्च भूतेषु स तीर्थफलमश्नुते ॥

दि.मा. घ.	प.	ति.	वा.	घ.	प.	समाप्ति	घं.	मि.	न.	घ.	प.	समाप्ति	घं.	मि.	यो.	घ.	प.	समाप्ति	घं.	मि.	क.	घ.	प.	घं.	मि.	क.	घ.	प.	घं.	मि.	योगः	अं.	का.	वं.	फ.	रा.	चन्द्रराशिसंचारः रा.	घ.	प.	घं.	मि.	सूर्योदय		सूर्यास्त		र. क्रा. द.		चन्द्रोदय घं.	मि.
२६	२३	१	मं.	३०	२२	सा.	१८	५२	पु.	६०	०	स.	×	×	वि.	५३	२३	रा.	४	५	कौ.	३०	२२	१८	५२	तै.	६०	०	×	×	प्र. मा	१२	१४	२७	१	२२						६	४३	५	१७	२१	४७	१८	१५
२६	२४	२	बु.	३४	०	सा.	२०	१९	पु.	२	११	प्रा	७	३९	प्री.	५३	२९	रा.	४	७	तै.	२	११	७	३६	ग.	३४	०	२०	१९	मातङ्ग	१३	१५	२८	२	२३						६	४३	५	१७	२१	३८	१९	९
२६	२६	३	बृ.	३८	३६	रा.	२२	९	श्ले	७	३३	दि	९	४४	आ.	५४	१४	रा.	४	२४	व.	६	१८	९	१४	वि.	३८	३६	२२	९	अमृत	१४	१६	२९	३	२४	सि.	७	३३	९	४४	६	४३	५	१७	२१	२७	२०	३
२६	२८	४	शु.	४३	४९	रा	०	१४	म.	१३	३६	दि.	१२	९	सौ.	५५	२४	रा.	४	२८	ब.	११	१२	११	११	गा.	४३	४९	०	१४	काण	१५	१७	१	४	२५						६	४२	५	१८	२१	१७	२०	५५
२६	३०	५	श.	४९	१७	रा.	२	२५	पू.	२०	७	दि.	१४	४५	शो.	५६	४४	प्रा.	५	२४	कौ.	१६	३३	१३	१९	तै.	४९	१७	२	२५	लुम्ब	१६	१८	२	५	२६	क.	३६	४६	२१	२४	६	४३	५	१८	२१	६	२१	४५
२६	३२	६	सू.	५४	३२	रा.	४	३०	उ.	२६	४०	सा.	१७	२२	अ.	५७	५२	प्रा.	५	५१	ग.	२१	५५	१५	२७	व.	५४	३२	४	३०	मित्र	१७	१९	३	६	२७						६	४२	५	१८	२०	५५	२२	३५
२६	३४	७	चं.	५९	१०	प्रा.	६	२१	ह	३२	४५	सा.	१९	४७	सु.	५८	३४	प्रा.	६	७	वि.	२६	५१	१७	२५	व.	५९	१०	६	२१	वज्र	१८	२०	४	७	२८						६	४१	५	१९	२०	४३	२३	२७
२६	३७	८	मं.	६०	०	स.	×	×	चि	३८	४	रा	२१	५४	धृ.	५८	३५	प्रा.	६	७	बा.	३१	२	१९	५	कौ.	६०	०	×	×	ध्वांक्ष	१९	२१	५	८	२९	तु.	५	२५	८	५१	६	४१	५	१९	२०	३१	०	१९
२६	३९	८	बु.	२	५४	प्रा.	७	५०	स्वा	४२	२२	रा	२३	३७	शू.	५७	४५	प्रा.	५	४६	कौ.	२	५४	७	५०	तै.	३४	१२	२०	२१	धूम्र	२०	२२	६	९	३०						६	४०	५	२०	२०	१९	१	१५
२६	४१	९	बृ.	५	३०	प्रा.	८	५२	वि.	४५	३०	रा	०	५२	गं.	५५	५९	प्रा.	५	३	ग.	५	३०	८	५२	व.	३६	१२	२१	८	प्र. मा.	२१	२३	७	१०	१	वृ.	२९	४३	१८	३३	६	४०	५	२०	२०	६	२	१५
२६	४४	१०	शु.	६	५२	दि.	९	२४	अ.	४७	२८	रा.	१	३७	वृ.	५३	१५	रा.	३	५७	वि.	६	५२	९	२४	ब.	३६	५४	२१	२५	रक्ष	२२	२४	८	११	२						६	३९	५	२१	१९	५२	३	१७
२६	४६	११	श.	६	५५	दि.	९	२५	ज्ये.	४८	५	रा	१	५३	ध्रु	४९	३२	रा	२	२७	बा.	६	५५	९	२५	कौ.	३६	२०	२१	११	मुसल	२३	२५	९	१२	३	ध.	४८	५	१	५३	६	३९	५	२१	१९	३९	४	१९
२६	४९	१२	सू.	५	४५	दि.	८	५६	मू.	४७	३७	रा.	१	४१	व्या	४४	५८	रा.	०	३६	तै.	४	४५	८	५६	ग.	३४	३५	२०	२८	सिद्धि	२४	२६	१०	१३	४						६	३८	५	२२	१९	२५	५	१९
२६	५१	१३	चं.	३	२४	प्रा.	८	०	पू.	४६	६	रा.	१	४	ह.	३९	२६	रा.	२२	२४	व.	३	२४	८	०	वि.	३१	४४	१९	१९	उत्पात	२५	२७	११	१४	५						६	३८	५	२२	१९	११	●	●
२६	५४	१४	मं.	[illegible]	[illegible]	प्रा	[illegible]	[illegible]	उ.	४३	४२	रा.	०	६	व.	३३	१३	स.	१९	५५	श.	०	३	६	३८	द.	[illegible]	[illegible]	[illegible]	[illegible]	मानस	२६	२८	१२	१५	६	म.	०	३०	६	४९	६	३७	५	२३	१८	५६	●	●

श्रीशुभसंवत् २०२७ शकः १८९२ माघकृष्णपक्षः (जनवरी ता० १२…२६, सन् १९७१) याम्यायनम्, याम्यगोलः, हेमन्तर्तुः, मकरार्कात् सौम्यायनम् शिशिरर्तुश्च ।

इष्टिः । माघे त्यजेन्मूलकम् । प्रयागाद्भिन्नस्थलेऽपि प्रयागस्मरणपूर्वकं स्नानेन तत्फलाप्तिः । अद्य पुंसवनसीमन्तोन्नयनादि मु. । द्वितीयायां*
पुष्ये शुभकर्मादौ स्वल्पकालसत्त्वेऽपि आवश्यके शुभकर्मणां मुहूर्त्तोऽवधयः । *दक्षिणदिग्यात्रा मुहूर्त्तश्च । केन्द्रांशवशेनमार्गीशनिः ६।५८ ।
म. ६।१८ (दि. ९।१४) उ. ३८।३६ (रा. २२।९) या.) । उ. षा. २ च. मकरेचाऽर्कः २१।१७ 'मकरेविंशतिःपरा' इति वचनात् दिवा ३।१४†
गणेश ४ व्रतम् (इयमेव संकष्ट चतुर्थी) । गणेशोत्पत्तिः । विशा. ४ च. वृश्चिके च कुजः ३।२३ । मू. ३ च. मार्गीबुधः ३०।५७ ।
पञ्चम्युत्तरा योगे यायियात्रा शुभा । †आदनात्परं सूर्यास्तावधि विशेषपुण्यकालः । अनु. ४ च. शुक्रः ४५।४० ।
भ. ५४।३२ (प्रा. ४।३०) उ. । तिथिदानादावश्यके प्रसूतिकास्नानशिशोस्ताम्बूलभक्षणनौकाघट्टनादि मु. । उ. षा. ३ च. रविः ३६।५५ ।‡
भ. २६।५१ (सा. १७।२५) या. । भानुसप्तमी ७ (सूर्योपरागसमा) । विष्टेः परं विविधशुभकर्मणां मुहूर्त्तोऽवधेयः ।
श्रीरामानन्द जयन्ती । चित्रायां स्वायीकार्येऽर्ह योगः । मू. ४ च. बुधः २५।४० । ‡ज्येष्ठायां शुक्रः ५२।१२ ।
अष्टम्यां शुभकर्मादौ स्वल्पकालः । कुम्भेदृश्यार्कः ४०।५ उ. षा. ४ च. रविः ५२।४० । अनुराधाभे कुजः २६।११ । ज्ये. २ च. शुक्रः ५६।१४ ।
भ. ३६।१२ (रा. २१।८) उ. । राष्ट्रीयमाघारम्भः । विष्टेः पूर्वं गोक्रयविक्रयादि मु. ।
भ. ६।५२ (दि. ९।२४) या. । विष्टेः परं मैत्रे जातकर्मनामकरणान्नप्राशनभूम्युपवेशनखट्वारोहणशिशोस्ताम्बूलभक्षणभैषज्यसेवनधान्यच्छेदन§
षट्तिला ११ एकादशीव्रतं सर्वेषाम् । ज्येष्ठायां नृत्यारम्भादि मु. । ज्ये. ३ च. शुक्रः ५८।८ । ¶२ च. बुधः १३।१९ ।
प्रदोषः । अद्य त्रयोदश्यां पुंसवनसीमन्तोन्नयनभैषज्यसेवननौकाघट्टनधान्यच्छेदनकर्णमर्दनादि मु. । श्रवणेऽर्कः ८।३५ ।
भ. ३।२४ (प्रा. ८।०) उ. ३१।४४ (सा. १९।१९) या. । मासशिवरात्रिः । त्रयोदश्यां विक्रयः शुभः । अनु. २ च. कुजः ४१।३९ । पू. षा.¶
स्नानदानश्राद्धादौ दर्शः ३० । मौनीअमावास्या ३० । प्रयागे दशाश्वमेधे वा स्नानात्फलाधिक्यम् । दोषाधिक्याच्छुभकर्ममुहूर्त्ताभावः । ज्येष्ठा.‖
§जलाशयारामसुरप्रतिष्ठादि विविध मु. । पू. षा. भ बुधः ३१।१ । ‖४ च. शुक्रः ५८।१९ ।

॥ विवाह मुहूर्त्ताः ॥

ति. ४ शुक्रे–मघा भे. दिवालग्नं चि. ।
" ५ शनौ–उ. फा. भे. ॥॥ऽ॥॥ रे. ९ ल. ६ ने. दा. ।
" ६ रवौ–उ. फा. भे दिवाल. चि. । हस्ते च ॥॥ऽऽऽ रे. ८ ल. ६ ।
" ७ चन्द्रे–हस्ते रे. ८ ल. गोधूलिः ।
" ८ कुजे–स्वात्यां ॥॥ऽ॥ऽ॥ रे. ८ ल. ६ ने. दा. ।
" ८ बुधे–स्वात्यां रे. ८ ल. गो. ।
" ९ गुरौ–मैत्रे भौमयोगाल्लग्नाभावः ।
" १० शुक्रे–मैत्रे पूर्वदोषः ।
" ११ शनौ–मूल भे. ॥ऽ॥॥॥ऽ रे. ८ ल. चि. ।
" १२ रवौ–मूल भे. मृत्युबाणव्याप्तेर्लग्नाभावः । अतः परं विवक्षयादिदोषसत्त्वाद्विवाहमुहूर्त्ताभावः ।

(३२ पृष्ठीय शेष कथाभागः)

§यस्तवैव हृदि स्थितः । तेन चेदविवादस्ते मा गङ्गां मा कुरून् गमः ॥ अवाक्शिराः तमस्यन्धे किल्बिषी नरकं व्रजेत् । यः प्रश्नं वितथं ब्रूयात् पृष्टः सन् धर्मनिश्चये ॥ यस्य विद्वान् हि वदतः क्षेत्रज्ञो नाभिशंकते तस्मान्नदेवाःश्रेयांसं लोकेऽन्यं पुरुषः विदुः ॥ साक्षिपृष्टश्च यद् प्रश्नान् राजानमन्यथा वदेत् । लोभाद्द्वेषाद् भयाद्वापि तं विद्याद् ब्रह्मघातकम् ॥ गौतमः—विप्रतिपत्तौ साक्षिनिमित्ता सत्य व्यवस्था स्वर्गः सत्यवचने विपर्यये नरकः सर्वेभ्यो धर्मेभ्यो गरीयः प्राड्विवाके सत्यवचनम् ॥

दैनिक लग्नसारिणी

तिथयः	मे.	प्र.	वृ.	प्र.	मि.	प्र.	क.	प्र.	सिं.	प्र.	क.	प्र.	तु.	प्र.	वृ.	प्र.	ध.	प्र.	म.	प्र.	कुं.	प्र.	मी.	प्र.	म. भा.	
१म.	११	४२	१३	२०	१५	१६	१७	२९	१९	४७	२२	१	०	१४	२	३०	४	४७	६	५३	८	३९	१०	११	४४	०
२बु.	११	३७	१३	१५	१५	११	१७	२४	१९	४२	२१	५६	०	९	२	२५	४	४२	६	४८	८	३४	१०	६	४४	०
३बृ.	११	३३	१३	११	१५	७	१७	२०	१९	३८	२१	५२	०	५	२	२१	४	३८	६	४४	८	३०	१०	२	४४	०
४शु.	११	२८	१३	६	१५	२	१७	१५	१९	३३	२१	४७	०	०	२	१६	४	३३	६	३९	८	२५	९	५७	४४	०
५श.	११	२४	१३	२	१४	५८	१७	११	१९	२९	२१	४३	२३	५६	२	१२	४	२९	६	३५	८	२१	९	५३	४४	०
६सू.	११	२०	१२	५८	१४	५४	१७	७	१९	२५	२१	३९	२३	५२	२	८	४	२५	६	३१	८	१७	९	४९	४४	१
७चं.	११	१५	१२	५३	१४	४९	१७	२	१९	२०	२१	३४	२३	४७	२	३	४	२०	६	२६	८	१२	९	४४	४४	१
८मं.	११	११	१२	४९	१४	४५	१६	५८	१९	१६	२१	३०	२३	४३	१	५९	४	१६	६	२२	८	८	९	४०	४४	१
८बु.	११	७	१२	४५	१४	४१	१६	५४	१९	१२	२१	२६	२३	३९	१	५५	४	१२	६	१८	८	४	९	३६	४४	१
९बृ.	११	३	१२	४१	१४	३७	१६	५०	१९	८	२१	२२	२३	३५	१	५१	४	८	६	१४	८	०	९	३२	४४	२
१०शु.	१०	५९	१२	३७	१४	३३	१६	४६	१९	४	२१	१८	२३	३१	१	४७	४	४	६	१०	७	५६	९	२८	४४	२
११श.	१०	५५	१२	३३	१४	२९	१६	४२	१९	०	२१	१४	२३	२७	१	४३	४	०	६	६	७	५२	९	२४	४४	३
१२सू.	१०	५१	१२	२९	१४	२५	१६	३८	१८	५६	२१	१०	२३	२३	१	३९	३	५६	६	२	७	४८	९	२०	४४	४
१३चं.	१०	४७	१२	२५	१४	२१	१६	३४	१८	५२	२१	६	२३	१९	१	३५	३	५२	५	५८	७	४४	९	१६	४४	४
१४मं.	१०	४३	१२	२१	१४	१७	१६	३०	१८	४८	२१	२	२३	१५	१	३१	३	४८	५	५४	७	४०	९	१२	४४	५

ति. १४ गुरौ–बुधचन्द्रयुतिः [illegible] चन्द्राद्दक्षिणः । अद्यैव गुरुचन्द्रयुतिः र. घ. १३।५ चन्द्राद्दक्षिणः ।
" ११ शनौ–शुक्रचन्द्रयुतिः र. घ. २५।२६ चन्द्रो दक्षिणे ।
" १३ चन्द्रे–बुधचन्द्रयुतिः र. घ. ११।२ चन्द्राद्दक्षिणे ।

मिश्रमानकालिका दैनिक स्पष्टग्रहास्तत्र दिनद्वयग्रहान्तरं गतिः

स्प. सू.				स्प. चं.				स्प. मं.				स्प. बु.				स्प. बृ.				स्प. शु.				स्प. श.				स्प. रा.				स्प. के.			
८	२८	२०	३०	३	१२	५४	२४	६	२८	३३	३२	८	५	२	२४	७	१०	३४	३८	७	११	१०	४६	०	१५	४५	२६	१०	५	४१	१७	४	५	४१	१७
८	२९	२१	५२	३	२५	१३	१०	६	२९	१०	४५	८	५	३१	५९	७	१०	४५	४५	७	१२	१४	२९	०	१५	४५	३०	१०	५	३८	७	४	५	३८	७
९	०	२३	१४	४	७	२२	५३	६	२९	४७	५९	८	६	७	५६	७	१०	५६	४६	७	१३	१८	१४	०	१५	४५	४१	१०	५	३४	५६	४	५	३४	५६
९	१	२४	३५	४	१९	२६	३६	७	०	२५	१०	८	६	४८	५५	७	११	७	४३	७	१४	२२	१४	०	१५	४५	५९	१०	५	३१	४५	४	५	३१	४५
९	२	२५	५५	५	१	२७	४७	७	१	२	२२	८	७	३४	४१	७	११	१८	३५	७	१५	२६	३६	०	१५	४६	२५	१०	५	२८	३४	४	५	२८	३४
९	३	२७	१५	५	१३	३०	२६	७	१	३९	३३	८	८	२४	५५	७	११	२९	२२	७	१६	३१	८	०	१५	४६	५८	१०	५	२५	२४	४	५	२५	२४
९	४	२८	३४	५	२५	३८	९	७	२	१६	४४	८	९	१९	२४	७	११	४०	२	७	१७	३६	६	०	१५	४७	३८	१०	५	२२	१३	४	५	२२	१३
९	५	२९	५२	६	७	५४	५	७	२	५३	५३	८	१०	१७	५३	७	११	५०	३८	७	१८	४१	१५	०	१५	४८	२६	१०	५	१९	२	४	५	१९	२
९	६	३१	१०	६	२०	२०	५९	७	३	३१	३	८	११	२०	९	७	१२	१	७	७	१९	४६	३८	०	१५	४९	२०	१०	५	१५	५१	४	५	१५	५१
९	७	३२	२७	७	३	१	१	७	४	८	९	८	१२	२५	५६	७	१२	११	३०	७	२०	५२	२०	०	१५	५०	२२	१०	५	१२	४१	४	५	१२	४१
९	८	३३	४३	७	१५	५५	४३	७	४	४५	१७	८	१३	३४	५९	७	१२	२१	४८	७	२१	५८	१०	०	१५	५१	३०	१०	५	९	३०	४	५	९	३०
९	९	३४	५८	७	२९	५	५१	७	५	२२	२४	८	१४	४७	६	७	१२	३१	५९	७	२३	४	२५	०	१५	५२	४६	१०	५	६	१९	४	५	६	१९
९	१०	३६	११	८	१२	३१	२७	७	५	५९	२९	८	१६	२	७	७	१२	४२	४	७	२४	१०	४७	०	१५	५४	९	१०	५	३	८	४	५	३	८
९	११	३७	२४	८	२६	११	४७	७	६	३६	३३	८	१७	१९	४१	७	१२	५२	३	७	२५	१७	२४	०	१५	५५	३९	१०	४	५९	५८	४	४	५९	५८
९	१२	३८	३५	९	१०	५	२१	७	७	१३	३७	८	१८	४०	३	७	१३	१	५६	७	२६	२४	१६	०	१५	[illegible]	१६	१०	४	५६	४७	४	४	५६	४७

ति. ४ शुक्रे



ति. १० शक्रे



[]चतस्रो घटिकाः प्रातररुणोदय उच्यते । अरुणोदये माघस्नानं कर्तव्यम् । तत्र मन्त्रः— दुःखदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय च । प्रातः स्नानं करोम्यद्य माघे पापविनाशनम् ॥ मकरस्थे रवौ माघे गोविन्दाच्युत माधव । स्नानेनानेन मे देव यथोक्तफलदो भव । इमौ मन्त्रौ समुच्चार्य स्नायान्मौनसमन्वितः । स्नानान्तरं प्रत्यहं सूर्यार्घ्यं दद्यात्तन्मन्त्रः—सवित्रे प्रसवित्रे च परं धाम जले मम । त्वत्तेजसा परिभ्रष्टं पापं यातु सहस्रधा इति पितृतर्पणादि नित्यं विधाय माधवं पूजयेत् । मासनियमाल्लाह–भूमौ शयीत होतव्यमाज्यं तिलसमन्वितम् । हविष्यं ब्रह्मचर्यं च माघमासे महाफलमिति । माघकृष्णचतुर्थ्यां शुक्रे गणेशोत्पत्तिः ॥ शिवधर्मे–सर्वदेवमयः साक्षात्सर्वमङ्गलकारकः । माघकृष्णचतुर्थ्यां तु प्रादुर्भूतो गणाधिपः ॥ चतुर्थीव्रतनिर्णयः–चतुर्थी गणेशव्रतातिरिक्तोपवासकार्ये पञ्चमीयुता ग्राह्या । गौरीविनायकव्रतयोस्तु मध्याह्नव्यापिनी ग्राह्या ॥ परदिने एव मध्याह्नव्यापिनी चेत्परैव ॥ दिनद्वये मध्याह्नव्यापित्वे दिनद्वये मध्याह्नव्याप्त्यभावे साम्येन वैषम्येण वैकदेशव्याप्त्या च पूर्वैव तृतीयायोगप्राशस्त्यात् । नागव्रते तु पूर्वदिन एव मध्याह्नव्यापिनी चेत्पूर्वैव ॥ उभयदिने मध्याह्नव्याप्त्यादिपक्ष चतुष्टय पंचमीयुतैव ग्राह्या ॥ श्रावणकृष्णचतुर्थी संकष्टचतुर्थी सा तु चन्द्रोदयव्यापिनी ग्राह्या ॥ परदिने चन्द्रोदयव्याप्तौ परैव ॥ उभयदिने चन्द्रोदय व्याप्तित्वे पूर्वैव ग्राह्या ॥ दिनद्वये चन्द्रोदयव्याप्त्यभावे पूर्वैव ॥ किन्त्वत्र चन्द्रोदये चतुर्थीयोगसत्वात्सर्वसंमतात् ति. ४ शुक्रे गणेशचतुर्थीव्रतमिति । अस्यां रात्रौ पूजनानन्तरं चन्द्रोदये चन्द्रार्घ्यदाने मन्त्राः–क्षीरोदार्णवसम्भूत अत्रिगोत्रसमुद्भव । गृहाणार्घ्यं शशाङ्केदं रोहिणीसहितो मम । ज्योत्स्नानां पतये तुभ्यं ज्योतिषां पतये नमः । नमस्ते रोहिणीकान्त सुधावास नमोस्तु ते ॥ नमो मण्डलदीपाय शिरोरत्नाय धूर्जटेः । कलाभिर्वर्द्धमानाय नमश्चन्द्राय चारवे । अथषट्तिलाः–तिलस्नायी तिलोद्वर्त्ती तिलहोमी तिलोदकी । तिलभुक् तिलदाता च षट्तिला पापनाशिनी ॥ अथ माघे ससुवर्णतिलपात्रदानाद्वाङ्मनःकायजत्रिविधपापक्षयः ब्रह्मलोकप्राप्तिश्च । तत्र दानमन्त्रः— देव देव जगन्नाथ वाञ्छितार्थफलप्रद । तिलपात्रं प्रदास्यामि तवाग्रे संस्थितोऽस्म्यहम् । मासेऽस्मिन्निन्धनकम्बलवस्त्रोपानहतैलघृततूल–पूर्णपात्रसुवर्णादिदानानि महाफलानि । प्रयाग महिमा महाभारते – वनपर्वणि युधिष्ठिरं प्रति पुलस्त्य उवाच–तपनस्य सुता देवी त्रिषु लोकेषु विश्रुता । यमुना गङ्गया सार्द्धं सङ्गता लोकपावनी । गङ्गायमुनयोर्मध्ये पृथिव्या जघनं स्मृतम् । प्रयागं संप्रतिष्ठानं कम्बलाश्वतरौ तथा ॥ तीर्थं भोगवती चैव वेदि रेषा प्रजापतेः । तत्र वेदाश्च यज्ञाश्च मूर्तिमन्तो युधिष्ठिर ॥ प्रजापतिमुपासन्ते ऋषयश्च तपोधनाः । यजन्ते क्रतुभिर्देवास्तथा चक्रधरा नृपाः ॥ ततः पुण्यतमं नाम त्रिषुलोकेषु भारत । प्रयागं सर्वतीर्थेभ्यः प्रवदन्त्यधिकं विभो ॥ तत्राभिषेकं यः कुर्यात्सङ्गमे लोक विश्रुते । पुण्यं स कलमाप्नोति राजसूयाश्वमेधयोः । कुरुक्षेत्रसमा गङ्गा यत्र तत्रावगाहिता । विशेषो वै कनखले प्रयागे परमं महत् । दशतीर्थसहस्राणि षष्टिकोट्यस्तथापराः । येषां सान्निध्यमत्रैव कीर्तितं कुरुनन्दन ॥ वैतरणीधेनुदानम् – या सा वैतरणी नाम यमद्वारे महानदी । शतयोजनविस्तीर्णा पृथुत्वे सा महासरित् । अगाधानन्तरूपा च दृष्टमात्रा भयप्रदा ॥ पतन्ति [illegible] मर्त्या क्रन्दमाना सुदारुणम् । उष्णे वर्षासु शीते च मारुते नाविरक्षणके । दातारं तारयेद्यस्मात् तस्माद्वैतरणी स्मृता ॥ दानकालः अयने विषुवे पुण्ये व्यतीपाते दिनक्षये । अन्येषु पुण्यकालेषु दीयते दानमादरात् । पटलामभयां कृष्णां दद्याद्वैतरणीं तु गाम् । स्वर्णशृङ्गीं रौप्यखुरां कांस्यपात्रोपदोहनाम्–कृष्णवस्त्रयुतां गां तु सप्त[illegible]समन्विताम् । कार्पासद्रोणशिखरे आसीनां हैमीं यमप्रतिमां लोकदण्डयुतां महिषारूढां पाशहस्तां कृत्वा इक्षुदण्डमय[illegible] पट्टसूत्रेण बद्ध्वा उपप्लुतं कृत्वा छत्रोपानहसमायुक्तां वैतरणीं गां मृत्युकाले वा प्रदद्यात् । अत्र संकल्पः–मम यमद्वारस्थितवैतरण्याः समुत्तरणार्थं इमां कृष्णां गां सवत्सां यमप्रतिमायुक्तां कृष्णवस्त्रयुग्मच्छन्नां सप्त[illegible]युतां कृष्णमाल्याद्यलंकृतां स्वर्णशृङ्गीमुपस्करोपेतां कार्पासद्रोणशिखरे संस्थापितां रुद्रदैवत्यां गोनाय शर्मणे सुप्र[illegible] तुभ्यम[illegible] न मम इति तिलयवघृत युक्तं गोपुच्छं द्विजहस्ते दद्यात् ।

CC-0 In Public Domain. Kirtikant Sharma Najafgarh Delhi Collection

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि, धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ॥ यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् । सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ॥ हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् । तस्मादुत्तिष्ठ कान्तेय युद्धाय कृतनिश्चयः ॥ सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ । ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥

ई.मा. प.	ति.	वा.	घ. प.	समाप्ति	घं. मि.	न.	घ. प.	समाप्ति	घं. मि.	यो.	घ. प.	समाप्ति	घं. मि.	क.	घ. प.	घं. मि.	क.	घ. प.	घं. मि.	योगः	अं.	फा.	बं.	फ.	रा.	चन्द्रराशिसंचारः रा.	घ.	प.	घं.	मि.	सूर्योदय	सूर्यास्त	र. क्रा. द.	चन्द्रास्त घं. मि.
